समस्त कार्यों की सिद्धि—साधक को चाहिए कि वह समस्त कार्यों की सिद्धि के लिए पार्वत शिखर, घनघोर अरण्य, सरिता-तट या शिव-मन्दिर में ब्रह्मचर्यपूर्वक भगवती बगला देवी के मन्त्र का एक लक्ष जप करे—

'पर्वताग्रे महारण्ये नदीसङ्गे शिवालये।
ब्रह्मचर्यरतो लक्षं जपेदखिलसिद्धये'॥

शत्रु-सामर्थ्य का विनाश—यदि साधक चीनी एवं मधु से युक्त एक वर्ण वाली गाय के दूध को बगला-मन्त्र से ३०० बार अभिमन्त्रित करके उस दूध को पी जाय तो उसके शत्रु का समस्त सामर्थ्य विनष्ट हो जाता है—

'एकवर्णगवीदुग्धं शर्करामधुसंयुतम् ।
त्रिशतं मन्त्रितं पीतं हन्याद् विषपराभवम्' ।।

शीघ्रगति सिद्धि—यदि साधक श्वेत पलाश की लकड़ी की सुन्दर खड़ाऊँ बनवाकर उसे अलक्तक या लाल रंग से रंगकर, १४ लाख बगलामन्त्रों से अभिमन्त्रित करके वह खड़ाऊँ धारण कर ले तो वह एक क्षण में १०० कोस का मार्ग तय कर लेता है—

'श्वेतपलाशकाष्ठेन रचिते रम्यपादुके ।
अलक्तरञ्जिते लक्षं मन्त्रयेन्मनुनाऽमुना ।
तदारूढः पुमान् गच्छेत् क्षणेन शतयोजनम्' ।।

अदृश्यीकरण—यदि साधक पारा, शिलाजीत, ताडपत्र के चूर्ण को मधु के साथ अपने शरीर के सभी अङ्गों में लेप कर ले और १४ लाख बगलामुखी का जप पूरा कर ले तो वह अदृश्य हो जाता है—

'पारदं च शिलां तालपिष्टं मधुसमन्वितम् ।
मनुना मन्त्रयेल्लक्षं लिम्पेत्तनाऽखिलां तनुम् ।
अदृश्यः स्यान्न्णामेष आश्चर्यं दृश्यतामिदम्' ।।

शत्रु के समस्त कार्यों का अवरोध—यदि साधक धतूरे के रस एवं निशाचूर्ण से हरिताल को घोंटकर षट्कोण यन्त्र में बीजमन्त्र एवं अपने शत्रु के नाम के पूरे अक्षर लिखकर उस यन्त्र को डोरे से लपेटकर अपने घर में रख दे। घूमते हुए कुम्भार के चाक की मिट्टी लेकर उस मिट्टी से बैल की एक सुन्दर मूर्ति बनाकर उस मूर्ति के मध्य उस यन्त्र को रखे और १४ दिनों तक उसमें हरताल का लेपन करके उस बैल का १४ दिन पर्यन्त पूजन करे तो शत्रु की वाणी, गति एवं उसके समस्त कार्य अवरुद्ध हो जाते हैं—

'षट्कोणे विलिखेद् बीजं साध्यनामान्वितं मनोः ।
हरितालं निशाचूर्णैरुन्मत्तरससंयुतैः ।।
शेषाक्षरैः समावीतं धरागेहविराजितम् ।
तद्यन्त्रं स्थापितं प्राणपीतसूत्रेण वेष्टयेत् ।।
भ्राम्यत् कुलालचक्रस्थां गृहीत्वा मृत्तिकां तथा ।
रचयेद् वृषभं रम्यं यन्त्रं तन्मध्यतः क्षिपेत् ।।
हरितालेन संलिप्य वृषं प्रत्यहमर्चयेत् ।
स्तम्भयेद् विद्विषां वाचं गतिं कार्य-परम्पराम्' ।।

शत्रु-गतिस्तम्भन—यदि साधक अपने वाम पाणि से श्मशानभूमि में स्थित मानव के कपाल (खोपड़ी) को लेकर चिता के अंगार से उस खोपड़ी में षट्कोण यन्त्र का निर्माण करके और उसे बगलामुखीमन्त्र से अभिमन्त्रित करके पृथ्वी में गाड़ दे तो शत्रु की गति का स्तम्भन हो जाता है—

'आदाय वामहस्तेन प्रेतभूमिस्थखर्परम् ।
अङ्गारेण चितास्थेन तत्र यन्त्रं समालिखेत्' ।।

शत्रु की वाणी का स्तम्भन—यदि साधक मृतक के कफ़न पर चिता के अङ्गार से यन्त्र निर्मित करके उसे मेढ़क के मुख में रखकर, मेढक सहित उस यन्त्र को पीले वस्त्र से लपेटकर पीले पुष्प से उसका पूजन करे तो शत्रु की वाणी स्तम्भित हो जाती है—

'प्रेतवस्त्रे लिखेद् यन्त्रमङ्गारेणैव वेष्टितम् ।
पूजितं पीतपुष्पैस्तद्वाचं संस्तभयेद्द्विषाम्' ।।

अतिवृष्टि-स्तम्भन—जहाँ अत्यन्त घनघोर वृष्टि होती हो उस स्थान पर षट्कोण यन्त्र निर्मित करके उस यन्त्र का वृषापत्र द्वारा मार्जन करने से अतिवृष्टि रुक जाती है—

'यद्भूमौ भविता दिव्यं तत्र यन्त्रं समालिखेत् ।
मार्जितं तद् वृषापत्रैर्दिव्यस्तम्भनकृद् भवेत्' ।।

जल-प्रवाह (बाढ़) का स्तम्भन—यदि साधक ७ या १४ बार इन्द्र एवं वरुण-मन्त्र से अभिमन्त्रित बगलामुखीयन्त्र को बाढ़ आये हुए जल में फेंक दे तो तत्क्षण बाढ़ रुक जाती है—

'इन्द्र-वारुणिकामूलं सप्तशो मनुमन्त्रितम् ।
क्षिप्तं जले दिव्यकृतं जलस्तम्भनकारकम्' ।।

इन प्रयोगों को सम्यक् रीति से निष्पादित करने पर शत्रु की गति एवं बुद्धि आदि का स्तम्भन होता है—

'शत्रूणां गतिबुद्ध्यादेः स्तम्भनो नाऽत्र संशयः' ।

तृतीय : अर्चा-खण्ड

(अध्याय : १०-११)



महाविद्या बगलामुखी की दशाङ्ग-साधना

दशम अध्याय

अर्चा के दशाङ्ग

भगवती बगलामुखी एवं सभी शक्तियों की अर्चा के दश अङ्ग माने गये हैं जो निम्नांकित हैं—कवच, हृदय, सहस्रनाम आदि सभी दशाङ्गों के मध्य भगवती (महाविद्या) बगलामुखी अवस्थित हैं। ये भगवती से पृथक् नहीं हैं। अर्चा यदि रथ है तो भगवती उसकी धुरी हैं। अर्चा यदि फल है तो भगवती उसका बीज हैं।


कवच (१)
हृदय (२)
सहस्र-नाम (३)
स्तवराज (४)
लहरी (५)
वेदपाद-स्तव (६)
आवरण-स्तव (७)
गीता (८)
अथर्व-शीर्ष (९)
अथर्व-स्तव (१०)
भगवती बगलामुखी

'मध्ये देवीं समावाह्य चिन्मयीं बगलाम्बिकाम्'। (सां.तं.)

'अर्चा' यदि परमाणु है तो भगवती परमाणु का केन्द्रक (न्यूक्लियस) हैं।

पूजा का यथार्थ स्वरूप—'स्वे महिम्न्यद्वये धाम्नि सा पूजा या परा स्थितिः'।
(संकेतपद्धति)

अर्चा और अर्च्य, पूजा और पूज्य, सेवा एवं सेव्य, भजन एवं भजनीय, साधन एवं साध्य, ध्यान एवं ध्येय, दर्शन एवं दृश्य, अनुभव एवं अनुभूयमान, उपासना और उपास्य, आराधना एवं आराध्य अविभाज्य, अपृथक् एवं एकात्म हैं। मान्त्रिक एवं मन्त्र भी अपृथक् है। इसीलिए काश्मीर के शैवतान्त्रिकों ने कहा था—'चित्तं मन्त्रः'[1]। यदि मन्त्र एवं मन्त्री में पृथक्ता हुई तो मन्त्र कभी सिद्ध हो ही नहीं सकता—

---

[1] शिवसूत्र (२।१)।

'पृथङ्मन्त्रः पृथङ्मन्त्री न सिद्ध्यति कदाचन।
ज्ञानमूलमिदं सर्वमन्यथा नैव सिद्ध्यति'[१] ॥

इसीलिए स्पन्दकारिका में कहा गया है कि—'सहाराधकचित्तेन तनैते शिवधर्मिणः'[२] ।

सामान्यतः उच्चारण किये जाने वाले मन्त्र 'मन्त्र' नहीं हैं—

'उच्चार्यमाणा ये मन्त्रा न मन्त्रांश्चापि तान्विदुः'।

(सर्वज्ञानोत्तर)

मन्त्रों की आत्मा—अर्चा के दशाङ्गों की आत्मा-साधना की आत्मा—उपासना का प्राण–मन्त्रों की जीवात्मा केवल पराशक्ति है—'मन्त्राणां जीवभूता तु या स्मृता शक्तिरव्यया' (तन्त्रसद्भाव)। क्योंकि—'मन्त्रयितुर्मन्त्रदेवतातादात्म्यप्रदः'। (शिवसूत्रविमर्शिनी) अर्चा का आदर्श रूप इस प्रकार है—

'यद् यद् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्'।

(शंकराचार्य)

भगवती की पूजा के बाह्याङ्ग एवं अन्तरङ्ग दो अङ्ग हैं। अन्तरङ्ग निम्नांकित हैं—वर्णसंख्या, उद्धार, मात्रा, उच्चारण, स्थान, प्रयत्न, रूप, विभिन्न स्थितियाँ आदि। ऋषि, छन्द, देवता, विनियोग, बीज, शक्ति, कीलक, न्यास, बाह्यपूजा एवं कवच नामक अङ्ग बाह्याङ्ग हैं। आचार्य भास्करराय की दृष्टि में ये ही साधनाङ्ग हैं। आचार्य हयग्रीव के मतानुसार—कवच, हृदय, स्तवराज, लहरी, वेदपादस्तव, सहस्रनाम, गीता आदि अर्चन के १० अङ्ग हैं। कवच क्या है ? युद्धक्षेत्र में सैनिक या सेनापति के वक्षःस्थल पर कवच होता है उसी प्रकार देव्याराधन के अङ्ग के रूप में कवच होता है। कवच एक रक्षक उपकरण है जो योद्धा को आयुधों से होने वाले आघातों से रक्षा करता है। साधना के अन्तर्गत जो कवच होता है वह अदृष्ट आसुर शक्तियों से तो रक्षा करता ही है साथ ही यह अनेक सिद्धियाँ भी प्रदान करते हैं।

'पठित्वा धारयित्वा तु त्रैलोक्ये विजयी भवेत्'।

योगरत्नावली नामक ग्रन्थ में कवच एवं अर्गला की नई दृष्टि से व्याख्या की गई है। कवच क्या है ? कवच बीज है। अर्गला क्या है ? अर्गला शक्ति है—'कवचं बीजमादिष्टमर्गलाशक्तिरुच्यते'। पाठ का सामान्य क्रम इस प्रकार है—कवच, अर्गला, कीलक, किन्तु पूर्वापर क्रम के सम्बन्ध में मतैक्य नहीं है।

दशाङ्गों के क्रम के सम्बन्ध में मतभेद है; यथा—चिदम्बरसंहिता में पहले अर्गला,

---

[१] श्रीकण्ठीसंहिता। [२] स्पन्दसूत्र (२।२)।

फिर कीलक एवं फिर कवच के पाठ करने का विधान है—'अर्गलं कीलकं चादौ पठित्वा कवचं पठेत्' ।

कवच के पढ़ने या धारण करने या पूजा करने से सारे वाञ्छित फल प्रदान करता है—'पठनाद् धारणादस्य पूजनात् वाञ्छितं लभेत्' । (रुद्रयामल)

रुद्रयामलतन्त्र (उत्तर खण्ड) में कहा गया है कि साधक को चाहिए कि वह भगवती के स्वरूप का ध्यान करके और एकाग्र होकर स्तोत्र का पाठ करे—

'हेमकुण्डलभूषां च पीतचन्द्रार्धशेखराम् ।
पीतभूषणपीताङ्गीं स्वर्णसिंहासने स्थिताम् ॥
एवं ध्यात्वा जपेत् स्तोत्रमेकाग्रकृतमानसः ।
सर्वसिद्धिमवाप्नोति मन्त्रध्यानपुरःसरम्' ॥

मन्त्र, स्तोत्र एवं यन्त्र—

'मन्त्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रं च ते
यन्त्रं वादिनियन्त्रणं त्रिजगतां...... ।
मातः श्रीबगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे
तन्नामस्मरणेन संसदि मुखस्तम्भो भवेद्वादिनाम् ॥
यत् कृतं जपसन्ध्यानं परमेश्वरि ! चिन्तनं तव ।
शत्रूणां स्तम्भनार्थाय तत् गृहाण नमोऽस्तु ते' ॥

१. पाठक्रम—पहले चक्र का पूजन करना चाहिए । उसके बाद देवता के मन्त्र का जप करना चाहिए । उसके बाद देवी के सहस्रनाम का पाठ करना चाहिए—

'चक्राधिराजमभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ।
जपान्ते कीर्तयेन्नित्यमिदं नामसहस्रकम्' ॥

भगवती बगला के प्रसङ्ग में पञ्चदशाक्षरी के स्थान पर बगलामन्त्र का जप करना चाहिए ।

शाक्त आचार्य हयग्रीव ने 'शाक्तदर्शनम्' में कहा है कि भगवती के अर्चन के १० अङ्ग हैं जो निम्नांकित हैं—



(१) 'जपेन्नित्यं दशाङ्गानि' ॥१७॥

(२) 'कवच-हृदय-सहस्रनाम-स्तवराज-लहरी-वेदपादस्तव-आवरणस्तव-गीता-अथर्वशीर्ष-सूक्तान्यङ्गानि'। (शाक्तदर्शनम् १६।३।१८)

भगवती बगलामुखी की उपासना के प्रसङ्ग में—(१) अथर्ववेदीय बगलासूक्त, (२) पीतोपनिषद्, (३) बगलामुखीस्तवराज, (४) पीताम्बरोपनिषद्, (५) बगलामुखी-कवच, (६) (रुद्रयामलोक्त अन्य) बगलामुखीकवच, (७) ब्रह्मास्त्रबगलाकवच, (८) विश्वसारोद्धारतन्त्र का बगलामुखीकवच, (९) विश्वयामलोक्त बगलामुखीकवच, (१०) रुद्रयामलोक्त प्रत्यङ्गिराकवच, (११) श्रीबगलामुखीशत्रुविनाशक कवच, (१२) वीरतन्त्रोक्त बगलामुखीकवच, (१३) बगलामुखीगायत्री, (१४) बगलामुखी पटल, (१५) बगलामुखीपटल (द्वितीय पटल), (१६) सिद्धेश्वरतन्त्र का बगलाहृदयस्तोत्र, (१७) विष्णुयामल का बगलाऽष्टोत्तरशतनामस्तोत्र, (१८) रुद्रयामल का बगलाऽष्टोत्तरशतनामस्तोत्र, (१९) बगलामुखीस्तोत्र, (२०) बगलासहस्रनामस्तोत्र, (२१) बगलापञ्जरस्तोत्र, (२२) सहस्रनामस्तोत्र (उत्कटशम्बरनागेन्द्रप्रयाणतन्त्र) आदि अर्चनाङ्ग (दशाङ्गान्तर्गत) सामग्री इसमें अन्तर्निविष्ट हैं।

भगवती की पञ्चोपचार, दशोपचार, षोडशोपचार, षट्त्रिंशोपचार सामग्रियों की ही भाँति स्तोत्र, कवच, हृदय, पटल, स्तवराज, कीलक, गीता, उपनिषद् आदि भी भगवती की उपासना के स्वाध्यायात्मक अङ्ग हैं। वेद भी कहता है—'स्वाध्यायप्रवचनाभ्यां मा प्रमदितव्यम्'।

(२) स्तोत्रादिक के पाठ के नियम—भगवती के विभिन्न प्रकार के स्तोत्रों के पाठ के सम्बन्ध में कतिपय विशिष्ट नियमों के परिपालन की बाध्यता है, क्योंकि वैसा न करने से स्तोत्रपाठ का पूर्ण फल नहीं मिलता।

नियम—

१. भगवती के स्तोत्रादिक के पाठ के साथ भगवती का ध्यान भी करते जाना चाहिए।

२. पाठ करते समय पाठकों के लिए नियमों का पालन करना आवश्यक है—

मधुरस्वर से पाठ, अक्षरों का स्पष्टोच्चारण, पदों का विभाग, उत्तम स्वर, धैर्य, एक लय के साथ पाठ—ये पाठकों के ६ गुण हैं—

'माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः'॥

(३) पाठ के दोष—यदि पाठक स्तोत्रादिक का पाठ करते समय निम्न त्रुटियाँ करें तो इन्हें पाठ का दोष माना जाता है—

i. पाठ करते समय रागपूर्वक गाना।

ii. उच्चारण में शीघ्रता करना।

iii. पाठ करते समय सिर हिलाना।
iv. स्वहस्तलिखित पुस्तक से पाठ करना।
v. अर्थ के ज्ञान के बिना पाठ करना।
vi. अधूरा मन्त्र कण्ठस्थ करना।

'गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः' ॥

(४) पाठक को चाहिए कि जब तक अध्याय पूर्ण न हो जाय तब तक वह मध्य में पाठ बन्द न करे।

(५) यदि पाठक को प्रमादवश अध्याय के मध्य में पाठ को विराम देना ही पड़े तो पुनः प्रति बार सम्पूर्ण अध्याय का पाठ करे—

'यावन्न पूर्यतेऽध्यायस्तावन्न विरमेत् पठन्।
यदि प्रमादादध्याये विरामो भवति प्रिये।
पुनरध्यायमारभ्य पठेत्सर्वं मुहुर्मुहुः' ॥

(६) स्तोत्रादिक पाठ की पुस्तक को हाथ में लेकर उसका पाठ नहीं करना चाहिए, क्योंक इसे पाठक का अज्ञान माना जाता है और इसके परिणामस्वरूप पाठक को पाठ का मात्र आधा फल ही प्राप्त होता है।

(७) स्तोत्र का पाठ मानसिक नहीं प्रत्युत वाचिक (स्पष्टतया सर्वश्रुत) होना चाहिए—

'अज्ञानात्स्थापिते हस्ते पाठे ह्यर्धफलं ध्रुवम्।
न मानसे पठेत्स्तोत्रं वाचिकं तु प्रशस्यते' ॥

(८) उच्च स्वर से पाठ करना भी वर्जित है और शीघ्रता से पाठ करना भी वर्जित है। पाठ यत्नपूर्वक शुद्ध एवं स्थिर चित्त से ही करना चाहिए—

'उच्चैःपाठं निषिद्धं स्यात्त्वरां च परिवर्जयेत्।
शुद्धेनाचलचित्तेन पठितव्यं प्रयत्नतः' ॥

(९) यदि पाठ कण्ठस्थ न हो तो पुस्तक से पाठ देखकर पाठ किया जा सकता है किन्तु यह स्तोत्र स्वलिखित तथा अब्राह्मण-लिखित नहीं होना चाहिए—

'कण्ठस्थपाठाभावे तु पुस्तकोपरि वाचयेत्।
न स्वयं लिखितं स्तोत्रं नाब्राह्मणलिपिं पठेत्' ॥

(१०) यदि एक सहस्र से अधिक श्लोकों या मन्त्रों का ग्रन्थ हो तो पुस्तक देखकर ही पाठ करना चाहिए। इससे कम श्लोक हों तो उन्हें कण्ठस्थ करके बिना पुस्तक के भी पाठ किया जा सकता है—

'पुस्तके वाचनं शस्तं सहस्रादधिकं यदि।
ततो न्यूनं तु भवेत् वाचनं पुस्तकं विना'॥

अन्य नियम—(१) देवी का ध्यान करके और पञ्चोपचार से पूजन करके फिर पुस्तक का पूजन करना चाहिए। यथा—

'ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्'॥
(वाराहीतन्त्र/चिदम्बरासंहिता)

(२) इसके बाद भगवती के समक्ष योनिमुद्रा का प्रदर्शन करके उन्हें प्रणाम करना चाहिए।

(३) इसके उपरान्त मूल मन्त्र से पीठ आदि में आधारशक्ति की स्थापना करके उसके ऊपर पुस्तक को समासीन करना चाहिए।

(४) इसके बाद शापोद्धार करना चाहिए।

(५) इसके अनन्तर उत्कीलन मन्त्र का जप करना चाहिए।

(६) शापोद्धारोपरान्त अन्तर्मातृका–बहिर्मातृका आदि न्यास करना चाहिए।

(७) तदनन्तर देवी का ध्यान करके साङ्ग पाठ करना चाहिए। (यथा दुर्गासप्तशती में कवच, अर्गला, कीलक एवं रहस्यत्रय ही ६ अङ्ग स्वीकार किये गये हैं।)

* * *

एकादश अध्याय

दशाङ्गात्मक साहित्य-सामग्री

दशाङ्ग

कवच, हृदय, सहस्रनाम, पटल, गीता, अथर्वशीर्ष, स्तवराज, अथर्वशीर्ष आदि दशाङ्गात्मक अर्चा का विधान वैष्णव, शैव, शाक्त, स्मार्त आदि सभी सम्प्रदायों में है। सभी अङ्गों के स्वरूप सम्प्रदायानुसार पृथक्-पृथक् अवश्य हैं।

वैसे पूजा के दो अङ्ग हैं—(१) अन्तरङ्ग तथा (२) बाह्याङ्ग।

(१) **अन्तरङ्ग अङ्ग**—विद्या के वर्णों की संख्या, उद्धार, काल या मात्रा, उच्चारण, स्थान, प्रयत्न, रूप, विभिन्न स्थितियाँ, आकार आदि।

(२) **बाह्य अङ्ग**—ऋषि, छन्द, देवता, विनियोग, बीजशक्ति, कीलक, न्यास, ध्यान, नियम एवं पूजा।

(३) **दशाङ्ग**—कवच, हृदय, सहस्रनाम, स्तवराज, लहरी, वेदपादस्तव, आवरणस्तव, गीता, अथर्वशीर्ष और अथर्वस्तव।

पूजा अपने यथार्थ स्वरूप में अङ्गातीत है—पूजन का पूज्य में लय ही यथार्थ पूजा है। 'अहं देवी न चान्योऽस्मि' ही यथार्थ पूजा है[1]। सारे मन्त्रों का लक्ष्य नाद है और नादों का लक्ष्य अनाहत नाद है, अनाहत नाद का लक्ष्य 'ॐ' है और ॐ का लक्ष्य उन्मनी हैं।

सारे मन्त्र अन्ततः 'ॐ' में लयीभूत हो जाते हैं, किन्तु ॐ की भी मात्राएँ हैं। भगवती के एकाक्षर, चतुरक्षर, षट्त्रिंदशदक्षर आदि जो भी मन्त्र हैं उनकी मात्राएँ हैं। महामन्त्र की मात्राएँ—बिन्दु = १२८ लव। अर्धचन्द्र = ६४ लव। रोधिनी = ३२ लव। नाद =१६ लव। नादान्त = ८ लव। शक्ति—४ लव। व्यापिका = २ लव। समना—१ लव। उन्मना = काल-विहीन अतः मात्राहीन, लवहीन[2]।

मन्त्र की व्याप्ति अपनी मात्राओं के आधार पर इस प्रकार है—बिन्दु १/२,

---

१. पूजा का यथार्थ स्वरूप : आचार्य शङ्कर की दृष्टि—

'आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विविधोपभोगरचना निद्रा समाधिस्थितिः।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद् यद् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्'॥

२. वरिवस्यारहस्यम्।

निरोधिनी १/८, नादान्त १/३२, व्यापिनी १/१२८, अर्द्धचन्द्र १/४, नाद १/१६, शक्ति १/६४, समना १/२५६।

मन्त्र की गति समना तक तो है किन्तु इसके बाद उसका समस्त अस्तित्व उन्मना में लयीभूत हो जाता है।

अथर्ववेदीय बगलासूक्त

अथर्ववेद के पञ्चम काण्ड के छठे अनुवाक में बगलासूक्त आता है जिसका नियमपूर्वक प्रतिदिन पारायण करने से कृत्याजनित समस्त व्याधियाँ नष्ट हो जाती हैं। भाष्यकार महीधर ने कृत्या-निवारणार्थ इसके उपयोग को रेखांकित किया है।

बगलासूक्त—

यां ते चक्रुरामे पात्रे यां चक्रुर्मिश्रधान्ये।
आमे मासे कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम्॥१॥
यां ते चक्रुः कृकवाका व्रजे वा यां कुरीरिणि।
अव्यां ते कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम्॥२॥
यां ते चक्रुरेकशके पशूनामुभयादति।
गर्दभे कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम्॥३॥
यां ते चक्रुरमूलायां वलगं वा नराच्याम्।
क्षेत्रे ते कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम्॥४॥
यां ते चक्रुर्गार्हपत्ये पूर्वाग्नावुत दुश्चितः।
शालायां कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम्॥५॥
यां ते चक्रुः सभायां यां चक्रुरधिदेवने।
अक्षेषु कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम्॥६॥
यां ते चक्रुः सेनायां यां चक्रुरिष्वायुधे।
दुन्दुभौ कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम्॥७॥
यां ते कृत्यां कूपे वदधुः श्मशाने वा निचख्नुः।
सद्मनि कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम्॥८॥
यां ते चक्रुः पुरुषस्यास्थे अग्नौ संकसुके च याम्।
म्रोकं निर्दाहं क्रव्यादं पुनः प्रतिहरामि ताम्॥९॥
अपथैनाजभारैणां तां पथेतः प्रहिण्मसि।
अधीरो मर्या धीरेभ्यः सञ्जभाराचित्या॥१०॥
यश्चकार न शशाक कर्तुं शश्रे पादभङ्गुरिम्।
चकार भद्रमस्मभ्यमभगो भगवद्भ्यः॥११॥
कृत्याकृतं वलगिनं मूलिनं शपथेऽप्ययम्।
इन्द्रस्तं हन्तुमहता वधेनाग्निर्विध्यत्वस्तया॥१२॥

●

पीतोपनिषद्

श्री गणेशाय नमः ।

अथ पीतोपनिषदारम्भः—ॐ अथारिमोचिनीम्पीताम्प्रणमामि यां ब्रह्मपत्नीं ब्रह्माणीम्पीताम्भास्वत्तनुमिवाराध्यमानो निपतति तिरः यद्द्वेष्टि कुलं पुरुषं परितापयति सन्नक्षयमानो निपतति ।

यः पीतामनुस्मरति स सर्वज्ञतामेति अथ ह मणिबन्धे पुरुषचतुष्टयज्ञानवर्तिनीं शरणमहम्प्रपद्ये ।

यन्नितान्तमाविष्करोति विद्विषः सेयम्पीतावयवैः पूज्या यो यं कालात्मको बोधः संसारमनुमर्दयति शत्रुः स लुप्यते यच्चिन्तनीया तच्चिन्तयामि यच्चिन्तयामि तद्भावयामि तारं मायां तदनु बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय कीलयेति पदं तारं मायां वह्निवल्लभान्तञ्जपन्नरीन्प्रोच्चाटयति प्रोत्सादयति इत्थं वेदेष्वागमेषु प्रसिद्धमूर्तिं बगलां श्रद्धामि यः श्रावयति सुनृतया गिरा तद्द्वेष्ट्र उच्चाटनयैव कल्पेरन् ।

एषा तामसी शक्तिस्तामसी शक्तिः राजसी शक्तिः राजसी शक्तिरित्याह भगवान्कालाग्निरुद्रः ।

इति पीतोपनिषद्

बगलामुखीस्तवराज

वन्दे सकलसन्देहदावपावकमीश्वरम् ।
करुणावरुणावासं भक्तकल्पतरुं गुरुम् ॥१॥
उल्लसत्पीतविद्योति विद्योतिततनुत्रयम् ।
निगमागमसर्वस्वमीडेऽहं तन्महन्महः ॥२॥
ॐ पूर्वं स्थिरमायां च बगलामुखि सर्वतः ।
दुष्टानां वाचमुच्चार्य मुखं पदं तथोद्धरेत् ॥३॥
स्तम्भयेति ततो जिह्वां कीलयेति समुद्धरेत् ।
बुद्धिं विनाशयेति पदं स्थिरमायामनुस्मरेत् ॥४॥
प्रणवं वह्निजायां चेत्येष पैताम्वरो मनुः ।
पातु मां सर्वदा सर्वं निग्रहानुग्रहक्षमः ॥५॥
कण्ठं नारद ऋषिः पातु पंक्तिश्छन्दोऽवतान्मुखम् ।
पीताम्बरा देवता तु हृन्मध्यमवतान्मम ॥६॥
ह्लीं बीजं स्तनयोर्मेऽव्यात् स्वाहा शक्तिश्च दन्तयोः ।
स कीलकं तथा गुह्ये विनियोगोऽवताद् वपुः ॥७॥
षड्दीर्घभाजा बीजेन न्यासोऽव्यान्मे करादिकम् ।
द्विपञ्चपञ्चनन्देषु दशभिर्मन्त्रवर्णकैः ॥८॥

षडङ्गकल्पना पातु षडङ्गानि ह्यनुक्रमात् ।
ऐं विद्यातत्त्वं क्लीं मायातत्त्वं सौश्च शिवात्मकम् ॥९॥
तत्त्वत्रयं सं बीजं च मूलं हृत्कण्ठमध्यगः ।
सुधाब्धौ हेमभूरूढचम्पकोद्यानमध्यतः ॥१०॥
गारुडोत्पलनिर्व्यूढस्वर्णसिंहासनोपरि ।
स्वर्णपङ्कजसंविष्टां त्रिनेत्रां शशिशेखराम् ॥११॥
पीतालङ्कारवसनां मल्लीचन्दनशोभिताम् ।
सव्याभ्यां पञ्चशाखाभ्यां वज्रं जिह्वां च बिभ्रतीम् ॥१२॥
मुद्गरं नागपाशं च दक्षिणाभ्यां मदालसाम् ।
भक्तारिविग्रहोद्योगप्रगल्भां बगलामुखीम् ॥१३॥
ध्यायमानस्य मे पातु शास्त्रवोद्द्वेषणे भृशम् ।
भूकलादलदिक्पत्रषट्कोणं त्र्यस्रबैन्दुकम् ॥१४॥
यन्त्रं पैताम्बरं पायाद् पायात् सा माम् अविग्रहा ।
आधारशक्तिमारभ्य ज्ञानात्मान्तास्तु शक्तयः ॥१५॥
पीठाद्याः पान्तु पीठेऽत्र प्रथमं मां च रक्षतु ।
शान्तिशङ्खविशेषात्मशक्तिभूतानि पान्तु माम् ॥१६॥
आवाहनाद्याः पञ्चापि मुद्राश्च सुमनोजलैः ।
त्रिकोणमध्यमारभ्य पूजिता बगलामुखी ॥१७॥
क्रोधिनी स्तम्भिनी चापि धारिण्यश्चापि मध्यगाः ।
ओजः पूषादिपीठानि कोणाग्रेषु स्थितानि वै ॥१८॥
त्रिकोणबाह्यतः सिद्धनाथाद्या गुरवस्तथा ।
सिद्धनाथः सिद्धानन्दनाथः सिद्धपरमेष्ठि हि ॥१९॥
नाथः सिद्धः श्रीकण्ठश्च नाथः सिद्धचतुष्टयम् ।
पातु मामथ षट्कोणे सुभगा भगरूपिणी ॥२०॥
भगोदया च भगनिपातिनी भगमालिनी ।
भगावह च मां पातु षट्कोणाग्रेषु च क्रमात् ॥२१॥
त्वगात्मा शोणितात्मा च मांसात्मा मेदसात्मकः ।
रूपात्मा परमात्मा च पातु मां स्थिरविग्रहा ॥२२॥
अष्टपत्रेषु मूलेषु ब्राह्मी माहेश्वरी तथा ।
कौमारी वैष्णवी वाराहीन्द्राणी च तथा पुनः ॥२३॥
चामुण्डा च महालक्ष्मीस्तत्र मध्ये पुनर्जया ।
विजया च जयाम्बा च राजिता जृम्भिणी तथा ॥२४॥
स्तम्भिनी मोहिनी वश्या कर्षिण्यथ तदग्रके ।
असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तकपालिनः ।
भीषणश्चापि संहार एते रक्षन्तु मां सदा ॥२५॥

ततः षोडशपत्रेषु मङ्गला स्तम्भिनी तथा।
जृम्भिणी मोहिनी वश्या ज्वालासिंही बलाहका ॥२६॥
भूधरा कल्मषा धात्री कन्यका कालकर्षिणी।
भ्रान्तिका मन्दगमना भोगस्था भाविकेति च ॥२७॥
पातु मामथ भूसद्म दशदिक्षु दिगीश्वराः।
इन्द्रोऽनलो यमो रक्षो वरुणो मारुतः शशी ॥२८॥
ईशोऽनन्तः स्वयम्भूश्च दशैते पान्तु मे वपुः।
वज्रः शक्तिर्दण्डखड्गौ पाशाङ्कुशगदाः क्रमात्।
शूलं चक्रं सरोजं च तत्तच्छस्त्राणि पान्तु माम् ॥२९॥
अथ च पूर्वादिचतुर्द्वारेषु परतः क्रमात्।
पातु विघ्नेशबटुकौ योगिनी क्षेत्रपालकः ॥३०॥
गुरुत्रयं त्रिरेखासु पातु मे वपुरञ्जसा।
पुनः पीताम्बरा पातु उपचारैः प्रपूजिता ॥३१॥
साङ्गावरणशक्तिश्च जयश्रीः पातु सर्वदा।
वलयं वटुकादिभ्यो रक्षां कुर्वन्तु मे सदा ॥३२॥
शक्तयः साधका वीराः पान्तु मे देवता इमाः।
इत्यर्चाक्रमतः प्रोक्तं स्तोत्रं पैताम्बरं परम् ॥३३॥
यः पठेत् सकृदप्येतत् सोऽर्चाफलमवाप्नुयात्।
सर्वथा कारयेत् क्षिप्रं प्रपद्यन्ते गदातुरान् ॥३४॥
राजानो राजपत्न्याश्च पौरजानपदास्तथा।
वशगास्तस्य जायन्ते सततं सेवका इव ॥३५॥
गुरुकल्पाश्च विबुधा मूकतां यान्ति तेऽग्रतः।
स्थिरीभवति तद्गेहे चपलापि हरिप्रिया ॥३६॥
पीताम्बराङ्गवसनो यदि लक्षसंख्यं
पैताम्बरं मनुममुं प्रजपेत् नरो यः।
हैमीं सकृन्नियमवान् विधिना हरिद्रा-
मालां दधत् भवति तद्वशगा त्रिलोकी ॥३७॥
भवानि बगलामुखि त्रिदशकल्पवल्लिप्रभो
कृपाजलनिधे तव चरणधूतबाधाखिलः।
सुरासुरनरादिकसकलभक्तभाग्यप्रदे
त्वदङ्घ्रिसरसीरुहद्वयमहं तु ध्याये सदा ॥३८॥
त्वमस्य जगतां जनिस्थितिविनाशबीजं निज-
प्रकाशबहुलद्युतिर्भवति भक्तहृन्मध्यगा।
त्रयीमनु सुपूजिता हरिहरादिवृन्दारकैरनु
क्षणमनुक्षणं मयि शिवे क्षणं वीक्ष्यताम् ॥३९॥

शिवे तव तनूमहं हरिहराद्यगम्यां परां,
निखिलतापप्रत्यूहहृदयाभावयुक्तां स्मरे।
विदारय विचूर्णय ग्लपय शोषय स्तम्भय
प्रणोदय विरोधय प्रविलय प्रबद्धारीणाम् ॥४०॥
क्व पार्वति कृपालसन् मयि कटाक्षपातं मनाग्
अनाकुलतया क्षणं क्षिप विपक्षसंक्षोभिणि।
यदीक्षणपथं गतः सकृदपि प्रभुः कश्चन
स्फुटं मम वशंवदो भवतु तेन पीताम्बरे ॥४१॥

'ॐ नमो भगवते महारुद्राय हुं फट् स्वाहा' इति भैरवमन्त्रः।

इति अथर्वणरहस्ये बगलामुख्या अर्चाक्रमस्तोत्रम्

पीताम्बरोपनिषद्

ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु, मा विद्विषावहै।
ॐ शान्तिः शान्तिः शान्तिः ॥

हम सबकी एक साथ रक्षा हो, हम एक साथ भोजन करें, सब मिलकर पराक्रम करें, हम सब तेजस्वी बनें, किसी से द्वेष न करें। शान्ति हो, शान्ति हो, शान्ति हो।

ॐ अथ हेनां ब्रह्मरन्ध्रे सुभगां ब्रह्मास्त्रस्वरूपिणीमाप्नोति ब्रह्मास्त्रां महाविद्यां शाम्भवीं सर्वस्तम्भकरीं, सिद्धां चतुर्भुजां, दक्षाभ्यां कराभ्यां मुद्गरपाशौ वामाभ्यां जिह्वावज्रे दधानां, पीतवाससं, पीतालङ्कारसम्पन्नां, दृढपीनोन्नतपयोधरयुग्माढ्यां, तप्तकार्तस्वरकुण्डलद्वयविराजितमुखाम्भोजां, ललाटपट्टोल्लसत्पीतचन्द्रार्धमनुबिभ्रतीम्, उद्यद्दिवाकरोद्योतां, स्वर्णसिंहासनमध्यमकलसंस्थां धिया सञ्चिन्त्य, तदुपरि त्रिकोण-षट्कोण-वसुपत्रवृत्तान्तः षोडशदलकमलोपरि भूबिम्बत्रयम् अनुसन्धाय तत्राद्ययोन्यन्तरे देवीमाहूय ध्यायेत्।

अब इस सुन्दरी, ब्रह्मास्त्रस्वरूपिणी, ब्रह्मास्त्रमहाविद्या, शाम्भवी, सर्वस्तम्भकरी, सिद्धा, चतुर्भुजा का जो दक्षकरों में मुद्गर और पाश, वामकरों में शत्रुजिह्वा और वज्रधारिणी है तथा पीतवस्त्रा, पीतालङ्कारयुक्ता, दृढपीनोन्नतकुचा, तप्तकाञ्चन-कुण्डलद्वयशोभिता, कुण्डलद्वयोपेतमुखाम्बुजा, ललाट पर पीतार्धचन्द्रधारिणी, उदित-भास्करसमा, स्वर्णसिंहासन पर कमल के मध्य संस्थित ब्रह्मरन्ध्र में बुद्धिपूर्वक चिन्तन करे। उस ब्रह्मरन्ध्र के ऊपर त्रिकोण, षट्कोण, अष्टदलकमल, वृत्त, षोडशदल कमल एवं तीन भूगृहों का अनुसन्धान करके उस मण्डल के आदि योनि (त्रिकोण) के मध्य देवी बगला का आवाहन करके ध्यान करे।

योनिं जगद्योनिं समायमुच्चार्य, शिवान्ते भूमाग्रबिन्दुमिन्दुखण्डमग्निबीजं ततो

वर्णाङ्कगुणार्थत्रियुतं स्थिरामुखि इति सम्बोध्य सर्वदुष्टानामिदं चाभाष्य, वाचमिति मुखमिति पदमिति स्तम्भयेति चोच्चार्य जिह्वां वैशारदीं कीलयेति बुद्धिं विनाशयेति प्रोच्चार्य भूमायां वेदाद्यं, ततो यज्ञभूगुहायां योजयेत्। स महास्तम्भेश्वर:, सर्वेश्वर:, स सेनास्तम्भं करोति। किं बहुना विवस्वद्धृतिस्तम्भकर्ता, सर्ववातस्तम्भकर्तेति किं दिवा कर्षयति स सर्वविद्येश्वर: सर्वमन्त्रेश्वरो भूत्वा पूजायाम् आवर्तनं त्रैलोक्यस्तम्भिन्या: कुर्यात्।

'ऐं ह्ल्रीं स्थिरामुखि ! सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्ल्रीं ॐ स्वाहा'।

हे स्थिरमुखी ! सभी दुष्टों के वचन, मुख, पद एवं पद का स्तम्भन करो; वैशारदी रसना को कीलित करो और बुद्धि का विनाश करो। इस मन्त्र का जप करना चाहिए।

ऐसा कहने वाला महान् स्तम्भेश्वर एवं सर्वेश्वर हो जाता है। वह सेना का स्तम्भ करता है। अधिक क्या ? वह सूर्य की गति का स्तम्भन करने वाला, समस्त वायु को स्तम्भित करने वाला और दिन को आकृष्ट करने वाला होता है। वह समस्त विद्याओं का स्वामी, समस्त मन्त्रों का मन्त्रेश्वर एवं त्रैलोक्य को स्तम्भित करने वाला है। अत: त्रैलोक्यस्तम्भिनी की पूजा का आवर्तन करता है।

अङ्गमाद्यं द्वारतो गणेशं, वटुकं, योगिनीं, क्षेत्राधीशं च पूर्वादिकमभ्यर्च्य, गुरुपंक्तिमीशा सुरान्तमन्त: प्राच्यादौ क्रमानुगता बगला, स्तम्भिनी, जृम्भिणी, मोहिनी, अचला, दुर्धरा, अकल्मषा, आधारा, कल्पना, कालकर्षिणी, भ्रमरिका, मन्दगमना, भोगिका (भोगा), योगिका।

ह्यष्टदलानुगा: पूज्या: ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, नारसिंही, चामुण्डा, महालक्ष्मीश्च षड्योनिगर्भान्ता डाकिनी, राकिनी, लाकिनी, काकिनी, शाकिनी, हाकिनी वेदाद्यस्थिरमायाया: समभ्यर्च्य शक्राग्नियमनिर्ऋतिर्वरुणवायुधनदेशानप्रजापति-नागेशा:, परिवाराभिमता: स्थिरादिवेदाद्या: सवाहना: सदस्त्रका बाह्यतोऽभ्यर्च्य तां योनिं रतिं प्रीतिमनोभुवा एता: सर्वा: समा: पीतांशुका ध्येया:।

इस पूजा का आद्य अङ्ग इस प्रकार है कि द्वार पर पूर्व आदि के क्रम से गणेश, बटुक, योगिनी और क्षेत्रपाल की पूजा करे। बिन्दु के ईशान कोण से अग्निकोण तक गुरुपंक्ति की एवं अन्दर पूर्वादिक्रम से—(१) मङ्गला, (२) स्तम्भिनी, (३) जृम्भिणी, (४) मोहिनी, (५) वश्या, (६) अचला, (७) चला, (८) दुर्धरा, (९) अकल्मषा, (१०) धीरा, (११) कलना, (१२) कालकर्षिणी, (१३) भ्रामिका, (१४) मन्दगमना, (१५) भोगदा (भाविका) और (१६) योगिका की षोडश दलों में पूजा करनी चाहिए।

अष्टदलों में—(१) ब्राह्मी, (२) माहेश्वरी, (३) कौमारी, (४) वैष्णवी, (५) वाराही, (६) नारसिंही, (७) चामुण्डा तथा (८) महालक्ष्मी की एवं ६ त्रिकोणों के मध्य—(१) डाकिनी, (२) राकिनी, (३) लाकिनी, (४) काकिनी, (५) शाकिनी तथा

(६) हाकिनी की 'ॐ ह्रीं' मन्त्र से पूजा करके—(१) इन्द्र, (२) अग्नि, (३) यम, (४) निर्ऋति, (५) वरुण, (६) वायु, (७) कुबेर, (८) ईशान, (९) प्रजापति और (१०) नागेश (अनन्त)—इन १० दिक्पालों की सपरिवार, सवाहन एवं सास्त्र भूगृह के बाह्य भाग में 'ॐ ह्रीं' मन्त्र से पूजा करनी चाहिए। त्रिकोण के तीनों कोणों में रति, प्रीति एवं मनोभवा की पूजा करनी चाहिए। इन सभी को पीतवस्त्रधारी के रूप में कल्पित करना चाहिए।

तदन्तमूलायां दलादिषोडशानुगताः पूज्या नीराजनैः सहैश्वर्ययुक्तो भवति, य एनां ध्यायति स वाग्मी भवति, सोऽमृतमश्नुते सर्वसिद्धिकर्ता भवति, सृष्टिस्थितिसंहारकर्ता भवति, स सर्वेश्वरो भवति, स तु ऋद्धीश्वरो भवति, स शाक्तः, स वैष्णवः, स गणपः, स शैवः, स जीवन्मुक्तो भवति, स संन्यासी भवति न तु मुण्डितमुण्डः। षट्त्रिंशदस्त्रेश्वरो भवेत्; सौभाग्यार्चनेनेति प्रोतं वेद ॐ शिवम्। 'सह नाववतु' इति मन्त्रेण शान्तिः।

नीराजना के साथ ऐसी पूजा करने वाला साधक ऐश्वर्यवान् हो जाता है।

जो इनका ध्यान करता है वह विद्वान् हो जाता है। वह दीर्घजीवी हो जाता है। वह सर्वसिद्धिकर्त्ता हो जाता है। वह सृष्टि, स्थिति एवं संहार का निष्पादन करने में समर्थ हो जाता है। वह सर्वेश्वर हो जाता है। वह ऋद्धीश्वर हो जाता है। वह शाक्त, वैष्णव, गणप, शैव एवं जीवन्मुक्त हो जाता है।

वह केवल मुण्डितमुण्ड न रहकर यथार्थ संन्यासी हो जाता है। सौभाग्यार्चन से छत्तीस अस्त्रों का अधीश्वर हो जाता है। 'ॐ शिवं सह नाववतु'—इस मन्त्र से शान्ति हो।

बगलामुखीकवच

रुद्रयामलमहातन्त्र का श्रीमहाविद्यापीताम्बराबगलामुखी कवच

मध्ये सुधाब्धिमणिमण्डपरत्नवेद्यां, सिंहासनोपरि गतां परिपीतवर्णाम्।
पीताम्बराभरणमाल्यविभूषिताङ्गीं, देवीं भजामि धृतमुद्गरवैरिजिह्वाम्॥१॥
जिह्वाग्रमादाय करेण देवीं वामेन शत्रून् परिपीडयन्तीम्।
गदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि॥२॥
हिमवत्तनया गौरी कैलासेऽथ शिलोच्यते।
अपृच्छद्गिः......देवी साधकानुग्रहेच्छया॥

श्रीपार्वत्युवाच

देवदेव महादेव भक्तानुग्रहकारक।
शृणु विज्ञाप्यते यत्तु श्रुत्वा सर्वं निवेदय॥२॥
विशुद्धाः कौलिका लोके ये मत्कर्मपरायणाः।
तेषां निन्दाकरा लोके बहवः किल दुर्जनाः॥३॥

मनोवाधां विदधते मुहुः कटुभिरुक्तिभिः ।
तेषामाशु विनाशाय त्वया देव प्रकाशितः ॥४॥
यो मन्त्रो बगलामुख्याः सर्वकामसमृद्धिदः ।
कवचं तस्य मन्त्रस्य प्रकाशय दयानिधे ॥५॥
यस्य स्मरणमात्रेण पशूनां निग्रहो भवेत् ।
आत्मानं सततं रक्षेद् व्याघ्राग्निरिपुराजतः ॥६॥
श्रुत्वाथ पार्वतीवाक्यं ज्ञात्वा तस्या मनोगतम् ।
विहस्य तां परिष्वज्य साधु साध्वित्यपूजयत् ॥७॥
तदाह कवचं देव्यै कृपया करुणानिधिः ।

श्रीशङ्कर उवाच

शृणु त्वं बगलामुख्याः कवचं सर्वकामदम् ॥८॥
यस्य स्मरणमात्रेण बगलामुखी प्रसीदति ।
सर्वसिद्धिप्रदा प्राच्यां पातु मां बगलामुखी ॥९॥
पीताम्बरा तु चाग्नेय्यां याम्यां महिषमर्दिनी ।
नैर्ऋत्यां चण्डिका पातु भक्तानुग्रहकारिणी ॥१०॥
पातु नित्यं महादेवी प्रतीच्यां शूकरानना ।
वायव्ये पातु मां काली कौबेर्यां त्रिपुराऽवतु ॥११॥
ईशान्यां भैरवी पातु पातु नित्यं सुरप्रिया ।
ऊर्ध्वं वागीश्वरी पातु मध्ये मां ललिताऽवतु ॥१२॥
अधस्ताद् अपि मां पातु वाराही चक्रधारिणी ।
मस्तकं पातु मे नित्यं श्रीदेवी बगलामुखी ॥१३॥
भालं पीताम्बरा पातु नेत्रे त्रिपुरभैरवी ।
श्रवणौ विजया पातु नासिकायुगलं जया ॥१४॥
शारदा वचनं पातु जिह्वां पातु सुरेश्वरी ।
कण्ठं रक्षतु रुद्राणी स्कन्धौ मे विन्ध्यवासिनी ॥१५॥
सुन्दरी पातु बाहू मे जया पातु करौ सदा ।
भवानी हृदयं पातु मध्यं मे भुवनेश्वरी ॥१६॥
नाभिं पातु महामाया कटिं कमललोचना ।
ऊरू मे पातु मातङ्गी जानुनी चापराजिता ॥१७॥
जङ्घे कपालिनी पातु चरणौ चञ्चलेक्षणा ।
सर्वतः पातु मां तारा योगिनी पातु चाग्रतः ॥१८॥
पृष्ठं मे पातु कौमारी दक्षपार्श्वे शिवाऽवतु ।
रुद्राणी वामपार्श्वे तु पातु मां सर्वदेष्टदा ॥१९॥
स्तुता सर्वेषु देवेषु रक्तबीजविनाशिनी ।
इत्येतत् कवचं दिव्यं धर्मकामार्थसाधनम् ॥२०॥

गोपनीयं प्रयत्नेन कस्यचिन्न प्रकाशयेत्।
यः सकृच्छृणुयाद् एतत् कवचं मन्मुखोदितम्॥२१॥
स सर्वान् लभते कामान् मूर्खो विद्यामवाप्नुयात्।
तस्याशु शत्रवो यान्ति यमस्य भवने शिवे॥

◆

(रुद्रयामलोक्त अन्य) श्रीबगलामुखीकवच

श्रीभैरवी उवाच

श्रुत्वा च बगलापूजां स्तोत्रं चापि महेश्वर।
इदानीं श्रोतुमिच्छामि कवचं वद मे प्रभो॥१॥
वैरिनाशकरं दिव्यं सर्वाऽशुभविनाशनम्।
शुभदं स्मरणात् पुण्यं त्राहि मां दुःखनाशन॥२॥

श्रीभैरव उवाच

कवचं शृणु वक्ष्यामि भैरवि प्राणवल्लभे।
पठित्वा धारयित्वा तु त्रैलोक्ये विजयी भवेत्॥३॥

ॐ अस्य श्रीबगलामुखीकवचस्य नारद ऋषिः, अनुष्टुप् छन्दः, श्रीबगलामुखी देवता, लं बीजम्, ईं शक्तिः, ऐं कीलकम्, पुरुषार्थचतुष्टये जपे विनियोगः।

शिरो मे बगला पातु हृदमेकाक्षरी परा।
ॐ ह्रीं ॐ मे ललाटे च बगला वैरिनाशिनी॥४॥
गदाहस्ता सदा पातु मुखं मे मोक्षदायिनी।
वैरिजिह्वाधरा पातु कण्ठं मे बगलामुखी॥५॥
उदरं नाभिदेशं च पातु नित्यं परात् परा।
परात् परतरा पातु मम गुह्यं सुरेश्वरी॥६॥
हस्तौ चैव तथा पातु पार्वती परिपातु मे।
विवादे विषमे घोरे संग्रामे रिपुसङ्कटे॥७॥
पीताम्बरधरा पातु सर्वाङ्गं शिवनर्तकी।
श्रीविद्या समयं पातु मातङ्गी पूरिता शिवा॥८॥
पातु पुत्रं सुतां चैव कलत्रं कालिका मम।
पातु नित्यं भ्रातरं मे पितरं शूलिनी सदा॥९॥
रन्ध्रे हि बगलादेव्याः कवचं मन्मुखोदितम्।
न वै देयममुख्याय सर्वसिद्धिप्रदायकम्॥१०॥
पठनाद् धारणादस्य पूजनाद् वाञ्छितं लभेत्।
इदं कवचमज्ञात्वा यो जपेद् बगलामुखीम्॥११॥

पिबन्ति शोणितं तस्य योगिन्यः प्राप्य सादराः ।
वश्ये चाकर्षणे चैव मारणे मोहने तथा ॥१२॥
महाभये विपत्तौ च पठेद् वा पठ्यते तु यः ।
तस्य सर्वार्थसिद्धिः स्याद् भक्तियुक्तस्य पार्वति ॥१३॥

ब्रह्मास्त्रबगलामुखीकवच

श्रीदक्षिणामूर्तिसंहितान्तर्गत-ब्रह्मास्त्रबगलामुखीकवच

श्रीब्रह्मोवाच

विश्वेश दक्षिणामूर्ते निगमागमवित् प्रभो ।
मह्यं पुरा त्वया दत्ता विद्या ब्रह्मास्त्रसंज्ञिता ॥१॥
तस्य मे कवचं ब्रूहि येनाहं सिद्धिमाप्नुयाम् ।
भवामि वज्रकवचं ब्रह्मास्त्रन्यासमात्रतः ॥२॥

श्रीदक्षिणामूर्तिरुवाच

शृणु ब्रह्मन् परं गुह्यं ब्रह्मास्त्रकवचं शुभम् ।
यस्योच्चारणमात्रेण भवेद् वै सूर्यसन्निभः ॥३॥
सुदर्शनं मया दत्तं कृपया विष्णवे तथा ।
तद्वत् ब्रह्मास्त्रविद्यायाः कवचं कथयाम्यहम् ॥४॥
अष्टाविंशत्यस्त्रहेतुमाद्यं ब्रह्मास्त्रमुत्तमम् ।
सर्वतेजोमयं सर्व सामर्थ्यं विग्रहं परम् ॥५॥
सर्वशत्रुक्षयकरं सर्वदारिद्र्यनाशनम् ।
सर्वापच्छैलराशीनामस्त्रकं कुलिशोपमम् ॥६॥
न तस्य शत्रवश्चापि भयं चौर्यभयं जरा ।
नरा नार्यश्च राजेन्द्र खगा व्याघ्रादयोऽपि च ॥७॥
तं दृष्ट्वा वशमायान्ति किमन्यत् साधवो जनाः ।
यस्य देहे न्यसेद् धीमान् कवचं बगलामयम् ॥८॥
स एव पुरुषो लोके केवलः शङ्करोपमः ।
न देयं परशिष्याय शठाय पिशुनाय च ॥९॥
दातव्यं भक्तियुक्ताय गुरुदासाय धीमते ।
कवचस्य ऋषिः श्रीमान् दक्षिणामूर्तिरिव च ॥१०॥
अस्यानुष्टुप् छन्दः स्यात् श्रीबगला चास्य देवता ।
बीजं श्रीवह्निजाया च शक्तिः श्रीबगलामुखी ॥११॥
कीलकं विनियोगश्च स्वकार्ये सर्वसाधके ।

अथ ध्यानम्

शुद्धस्वर्णनिभां रामां पीतेन्दुखण्डशेखराम् ।
पीतगन्धानुलिप्ताङ्गीं पीतरत्नविभूषणाम् ॥
पीनोन्नतकुचां स्निग्धां पीतलाङ्गीं सुपेशलाम् ।
त्रिलोचनां चतुर्हस्तां गम्भीरां मदविह्वलाम् ॥
वज्रारिरसनापाशमुद्गरं दधतीं करैः ।
महाव्याघ्रासनां देवीं सर्वदेवनमस्कृताम् ॥
प्रसन्नां सुस्मितां क्लिन्नां सुपीतां प्रमदोत्तमाम् ।
सुभक्तदुःखहरणे दयार्द्रां दीनवत्सलाम् ।
एवं ध्यात्वा परेशानि बगलाकवचं स्मरेत् ॥

अथ रक्षाकवचम्

बगला मे शिरः पातु ललाटं ब्रह्मसंस्तुता ।
बगला मे भ्रुवौ नित्यं कर्णयोः क्लेशहारिणी ।
त्रिनेत्रा चक्षुषी पातु स्तम्भिनी गण्डयोस्तथा ।
मोहिनी नासिकां पातु श्रीदेवी बगलामुखी ।
ओष्ठयोर्दुर्धरा पातु सर्वदन्तेषु चञ्चला ।
सिद्धान्तपूर्णा जिह्वायां जिह्वाग्रे शारदाम्बिके ॥
अकल्मषा मुखे पातु चिबुके बगलामुखी ।
धीरा मे कण्ठदेशे तु कण्ठाग्रे कालकर्षिणी ॥

ब्रह्मास्त्रबगलाकवचम्

शुद्धस्वर्णनिभा पातु कण्ठमध्ये तथाऽम्बिका ।
कण्ठमूले महाभोगा स्कन्धौ शत्रुविनाशिनी ॥
भुजौ मे पातु सततं बगला सुस्मिता परा ।
बगला मे सदा पातु कूर्परे कमलोद्भवा ॥
बगलाम्बा प्रकोष्ठौ तु मणिबन्धे महाबला ।
बगलाश्रीर्हस्तयोश्चैवं कुरुकुल्ला कराङ्गुलिम् ॥
नखेषु वज्रहस्ता च हृदये ब्रह्मवादिनी ।
स्तनौ मे मन्दगमना कुक्षयोर्योगिनी तथा ॥
उदरं बगला माता नाभिं ब्रह्मास्त्रदेवता ।
पुष्टिं मुद्गरहस्ता च पातु नो देववन्दिता ॥
पार्श्वयोर्हनुमद्वन्द्या पशुपाशविमोचिनी ।
करौ रामप्रिया पातु उरुयुग्मं महेश्वरी ॥
भगमाला तु गुह्यं मे लिङ्गं कामेश्वरी तथा ।

लिङ्गमूले महाक्लिन्ना वृषणौ पातु दूतिका ।
बगला जानुनी पातु जानुयुग्मं च नित्यश: ॥
जङ्घे पातु जगद्धात्री गुल्फौ रावणपूजिता ॥
चरणौ दुर्जया पातु पीताम्बा चरणाङ्गुली: ।
पादपृष्ठं पद्महस्ता पादाधश्चक्रधारिणी ॥
सर्वाङ्गं बगला देवी पातु श्रीबगलामुखी ।
ब्राह्मी मे पूर्वत: पातु माहेशी वह्निभागत: ॥
कौमारी दक्षिणे पातु वैष्णवी स्वर्गमार्गत: ।
ऊर्ध्वं पाशधरा पातु शत्रुजिह्वाधरा ह्यध: ॥
रणे राजकुले वादे महायोगे महाभये ।
बगला भैरवी पातु नित्यं क्लीङ्काररूपिणी ॥
इत्येवं वज्रकवचं महाब्रह्मास्त्रसंज्ञकम् ।
त्रिसन्ध्यं य: पठेद् धीमान् सर्वैश्वर्यमवाप्नुयात् ॥
न तस्य शत्रव: केऽपि सखाय: सर्व एव च ।
बलेनाकृष्य शत्रुं स्यात् सोऽपि मित्रत्वमाप्नुयात् ॥
शत्रुत्वे मरुता तुल्यो धनेन धनदोपम: ।
रूपेण कामतुल्य: स्याद् आयुषा शूलधृक्सम: ॥
सनकादिसमो धैर्ये श्रिया विष्णुसमो भवेत् ।
तत्तुल्यो विद्यया ब्रह्मन् यो जपेत् कवचं नर: ॥
नारी वापि प्रयत्नेन वाञ्छितार्थमवाप्नुयात् ।
द्वितीया सूर्यवारेण यदा भवति पद्मभू: ॥
तस्यां जातं शतावृत्या शीघ्रं प्रत्यक्षमाप्नुयात् ।
याता तुरीयं सन्ध्यायां भूशय्यायां प्रयत्नत: ॥
सर्वान् शत्रून् क्षयं कृत्वा विजयं प्राप्नुयान्नर: ।
दारिद्र्यान् मुच्यते चाऽशु स्थिरा लक्ष्मीर्भवेद् गृहे ॥
सर्वान् कामानवाप्नोति सविषो निर्विषो भवेत् ।
ऋणनिर्मोचनं स्याद् वै सहस्रावर्तनाद् विधे ॥
भूतप्रेतपिशाचादिपीडा तस्य न जायते ।
द्युमणिर्भ्राजते यद्वत् तद्वत् स्याच्छ्री: प्रभावत: ॥
स्थिराभया भवेत् तस्य य: स्मरेद् बगलामुखीम् ।
जयदं बोधनं कामममुकं देहि मे शिवे ॥
जपस्यान्ते स्मरेद् यो वै सोऽभीष्टफलमाप्नुयात् ।
इदं कवचमज्ञात्वा यो जपेद् बगलामुखीम् ॥

न स सिद्धिमवाप्नोति साक्षाद् वै लोकपूजितः ।
तस्मात् सर्वप्रयत्नेन कवचं ब्रह्मतेजसम् ।।
नित्यं पदाम्बुजध्यानान् महेशानसमो भवेत् ।।

विश्वसारोद्धारतन्त्रोक्त बगलामुखीकवच

कैलासाचलमध्यगं पुरवहं शान्तं त्रिनेत्रं शिवं
वामस्था गिरिजा प्रणव्य कवचं भूतिप्रदं पृच्छति ।
देवी श्रीबगलामुखी रिपुकुलारण्याग्निरूपा च या
तस्याश्चापविमुक्तमन्त्रसहितं प्रीत्याधुना ब्रूहि माम् ।।१।।

श्रीशङ्कर उवाच

देवि श्रीभववल्लभे शृणु महामन्त्रं विभूतिप्रदं
देव्या वर्मयुतं समस्तसुखदं साम्राज्यदं मुक्तिदम् ।
तारं रुद्रवधू विरञ्चिमहिला विष्णुप्रिया कामयुक्
कान्ते श्रीबगलानने मम रिपून् नाशाय युग्मं त्वति ।।२।।
ऐश्वर्याणि पदं च देहि युगलं शीघ्रं मनोवाञ्छितं
कार्यं साधय युग्मयुच्छिववधूवह्निप्रियान्तो मनुः ।
कंसारेस्तनयं च बीजमपरा शक्तिश्च वाणी तथा
कीलं श्रीमति भैरवर्षिसहितं छन्दो विराट्संयुतम् ।।३।।
स्वेष्टार्थस्य परस्य वेति नितरां कार्यस्य सम्प्राप्तये
नानाऽसाध्यमहागदस्य नियतं नाशाय वीर्याप्तये ।
ध्यात्वा श्रीबगलाननां मनुवरं जप्त्वा सहस्राख्यकं
दीर्घैः षट्कयुतैश्च रुद्रमहिलाबीजैर्विन्यस्याङ्गके ।।४।।

ध्यानम्

सौवर्णासनसंस्थितां त्रिनयनां पीतांशुकोल्लासिनीं
हेमाभाङ्गरुचिं शशाङ्कमुकुटां सच्चम्पकस्रग्युताम् ।
हस्तैर्मुद्‌गरपाशवज्ररसनाः सम्बिभ्रतीं भूषणै-
र्व्याप्ताङ्गीं बगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तयेत् ।।

ॐ अस्य श्रीबगलामुखीब्रह्मास्त्रमन्त्रकवचस्य भैरव ऋषिः, विराट् छन्दः, श्रीबगलामुखी देवता, क्लीं बीजम्, ऐं शक्तिः, श्रीं कीलकं, मम परस्य च मनोभिलाषितेष्टकार्यसिद्धये विनियोगः । शिरसि भैरवऋषये नमः, मुखे विराट्छन्दसे नमः, हृदि बगलामुखीदेवतायै नमः, गुह्ये क्लीं बीजाय नमः, पादयोः ऐं शक्तये नमः, सर्वाङ्गे श्रीं कीलकाय नमः । ॐ ह्रां अङ्गुष्ठाभ्यां नमः, ॐ ह्रीं तर्जनीभ्यां नमः, ॐ ह्रूं

मध्यमाभ्यां नमः, ॐ ह्लैं अनामिकाभ्यां नमः, ॐ ह्लौं कनिष्ठिकाभ्यां नमः, ॐ ह्लः करतलकरपृष्ठाभ्यां नमः। ॐ ह्लां हृदयाय नमः, ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लूं शिखायै वषट्, ॐ ह्लैं कवचाय हुम्, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः अस्त्राय फट्।

मन्त्रोद्धारः

ॐ ह्लीं ऐं श्रीं क्लीं श्रीबगलानने मम रिपून् नाशय नाशय, ममैश्वर्याणि देहि देहि, शीघ्रं मनोवाञ्छितं कार्यं साधय साधय ह्लीं स्वाहा।

शिरो मे पातु ॐ ह्लीं ऐं श्रीं क्लीं पातु ललाटकम्।
सम्बोधनपदं पातु नेत्रे श्रीबगलानने ॥१॥
श्रुतौ मम रिपुं पातु नासिकां नाशयद्वयम्।
पातु गण्डौ सदा मामैश्वर्याण्यन्तं तु मस्तकम् ॥२॥
देहि द्वन्द्वं सदा जिह्वां पातु शीघ्रं वचो मम।
कण्ठदेशं मनः पातु वाञ्छितं बाहुमूलकम् ॥३॥
कार्यं साधयद्वन्द्वं तु करौ पातु सदा मम।
मायायुक्ता यथा स्वाहा हृदयं पातु सर्वदा ॥४॥
अष्टाधिकचत्वारिंशदण्डाढ्या बगलामुखी।
रक्षां करोतु सर्वत्र गृहेऽरण्ये सदा मम ॥५॥
ब्रह्मास्त्राख्यो मनुः पातु सर्वाङ्गे सर्वसन्धिषु।
मन्त्रराजः सदा रक्षां करोतु मम सर्वदा ॥६॥
ॐ ह्लीं पातु नाभिदेशं कटिं मे बगलाऽवतु।
मुखिवर्णद्वयं पातु लिङ्गं मे मुष्कयुग्मकम् ॥७॥
जानुनी सर्वदुष्टानां पातु मे वर्णपञ्चकम्।
वाचं मुखं तथा पादं षड्वर्णाः परमेश्वरी ॥८॥
जङ्घायुग्मे सदा पातु बगला रिपुमोहिनी।
स्तम्भयेति पदं पृष्ठं पातु वर्णत्रयं मम ॥९॥
जिह्वावर्णद्वयं पातु गुल्फौ मे कीलयेति च।
पादोर्ध्वं सर्वदा पातु बुद्धिं पादतले मम ॥१०॥
विनाशयपदं पातु पादाङ्गुल्योर्नखानि मे।
ह्लीं बीजं सर्वदा पातु बुद्धीन्द्रियवचांसि मे ॥११॥
सर्वाङ्गं प्रणवः पातु स्वाहा रोमाणि मेऽवतु।
ब्राह्मी पूर्वदले पातु चाग्नेय्यां विष्णुवल्लभा ॥१२॥
माहेशी दक्षिणे पातु चामुण्डा राक्षसेऽवतु।
कौमारी पश्चिमे पातु वायव्ये चापराजिता ॥१३॥
वाराही चोत्तरे पातु नारसिंही शिवेऽवतु।
ऊर्ध्वं पातु महालक्ष्मीः पाताले शारदाऽवतु ॥१४॥

इत्यष्टौ शक्तय: पान्तु सायुधाश्च सवाहना: ।
राजद्वारे महादुर्गे पातु मां गणनायक: ॥१५॥
श्मशाने जलमध्ये च भैरवश्च सदाऽवतु ।
द्विभुजा रक्तवसना: सर्वाभरणभूषिता: ॥१६॥
योगिन्य: सर्वदा पान्तु महारण्ये सदा मम ।
इति ते कथितं देवि ! कवचं परमाद्भुतम् ॥१७॥
श्रीविश्वविजयं नाम कीर्तिश्रीविजयप्रदाम् ।
अपुत्रो लभते पुत्रं धीरं शूरं शतायुषम् ॥१८॥
निर्धनो धनमाप्नोति कवचस्यास्य पाठत: ।
जपित्वा मन्त्रराजं तु ध्यात्वा श्रीबगलामुखीम् ॥१९॥
पठेदिदं हि कवचं निशायां नियमात् तु य: ।
यद् यत् कामयते कामं साध्यासाध्ये महीतले ॥२०॥
तत् तत् काममवाप्नोति सप्तरात्रेण शङ्करि ।
गुरुं ध्यात्वा सुरां पीत्वा रात्रौ शक्तिसमन्वित: ॥२१॥
कवचं य: पठेद् देवि ! तस्यासाध्यं न किञ्चन ।
यं ध्यात्वा प्रजपेन्मन्त्रं सहस्रं कवचं पठेत् ॥२२॥
त्रिरात्रेण वशं याति मृत्यो: तन्नात्र संशय: ।
लिखित्वा प्रतिमां शत्रो: सतालेन हरिद्रया ॥२३॥
लिखित्वा हृदि तन्नाम तं ध्यात्वा प्रजपेत् मनुम् ।
एकविंशद्दिनं यावत् प्रत्यहं च सहस्रकम् ॥२४॥
जप्त्वा पठेत् तु कवचं चतुर्विंशतिवारकम् ।
संस्तम्भं जायते शत्रोर्नात्र कार्या विचारणा ॥२५॥
विवादे विजयं तस्य संग्रामे जयमाप्नुयात् ।
श्मशाने च भयं नास्ति कवचस्य प्रभावत: ॥२६॥
नवनीतं चाभिमन्त्र्य स्त्रीणां दद्यान्महेश्वरि ।
वन्ध्यायां जायते पुत्रो विद्याबलसमन्वित: ॥२७॥
श्मशानाङ्गारमादाय भौमे रात्रौ शनावथ ।
पादोदकेन स्पृष्ट्वा च लिखेत् लोहशलाकया ॥२८॥
भूमौ शत्रो: स्वरूपं च हृदि नाम समालिखेत् ।
हस्तं तद्धृदये दत्वा कवचं तिथिवारकम् ॥२९॥
ध्यात्वा जपेन्मन्त्रराजं नवरात्रं प्रयत्नत: ।
म्रियते ज्वरदाहेन दशमेऽह्नि न संशय: ॥३०॥
भूर्जपत्रेष्विदं स्तोत्रमष्टगन्धेन संलिखेत् ।
धारयेद् दक्षिणे बाहौ नारी वामभुजे तथा ॥३१॥

संग्रामे जयमाप्नोति नारी पुत्रवती भवेत्।
ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तति तं जनम् ॥३२॥
सम्पूज्य कवचं नित्यं पूजायाः फलमालभेत्।
बृहस्पतिसमो वापि विभवे धनदोपमः ॥३३॥
कामतुल्यश्च नारीणां शत्रूणां च यमोपमः।
कवितालहरी तस्य भवेद् गङ्गाप्रवाहवत् ॥३४॥
गद्यपद्यमयी वाणी भवेद् देवीप्रसादतः।
एकादशशतं यावत् पुरश्चरणमुच्यते ॥३५॥
पुरश्चर्याविहीनं तु न चेदं फलदायकम्।
न देयं परशिष्येभ्यो दुष्टेभ्यश्च विशेषतः ॥३६॥
देयं शिष्याय भक्ताय पञ्चत्वं चान्यथाऽऽप्नुयात्।
इदं कवचमज्ञात्वा भजेद् यो बगलामुखीम्।
शतकोटिं जपित्वा तु तस्य सिद्धिर्न जायते ॥३७॥
दाराढ्यो मनुजोऽस्य लक्षजपतः प्राप्नोति सिद्धिं परां
विद्यां श्रीविजयं तथा सुनियतं धीरं च वीरं वरम्।
ब्रह्मास्त्राख्यमनुं विलिख्य नितरां भूर्जेऽष्टगन्धेन वै
धृत्वा राजपुरं व्रजन्ति खलु ते दासोऽस्ति तेषां नृपः ॥३८॥

●

विश्वयामलोक्त-बगलामुख्यास्त्रैलोक्यविजयं कवचम्

श्रीभैरव उवाच

श्रृणु देवि! प्रवक्ष्यामि स्वरहस्यं च कामदम्।
श्रुत्वा गोप्यं गुप्ततमं कुरु गुप्तं सुरेश्वरि ॥१॥
कवचं बगलामुख्याः सकलेष्टप्रदं कलौ।
तत्सर्वस्वं परं गुह्यं गुप्तं च शरजन्मना ॥२॥
त्रैलोक्यविजयं नाम कवचेशं मनोरमम्।
मन्त्रगर्भ ब्रह्ममयं सर्वविद्याविनायकम् ॥३॥
रहस्यं परमं ज्ञेयं साक्षादमृतरूपकम्।
ब्रह्मविद्यामयं वर्म दुर्लभं प्राणिनां कलौ ॥४॥
पूर्णमेकोनपञ्चाशद्वर्णैरुक्तं महेश्वरि।
त्वद्भक्त्या वच्मि देवेशि! गोपनीयं स्वयोनिवत् ॥५॥

श्रीदेव्युवाच

भगवन्! करुणासार! विश्वनाथ! सुरेश्वर!
कर्मणा मनसा वाचा न वदामि कदाचन ॥१॥

श्रीभैरव उवाच

त्रैलोक्यविजयाख्यस्य कवचास्यास्य पार्वति ।
मनुगर्भस्य गुप्तस्य ऋषिर्देवोऽस्य भैरवः ॥१॥
उष्णिक्छन्दः समाख्यातं देवी श्रीबगलामुखी ।
बीज ह्लीं ॐ शक्तिः स्यात् स्वाहा कीलकमुच्यते ॥२॥
विनियोगः समाख्यातः त्रिवर्गफलप्राप्तये ।
देवि त्वं पठ वर्मैतन्मन्त्रगर्भं सुरेश्वरि ॥३॥
विना ध्यानं कुतः सिद्धिः सत्यमेतच्च पार्वति ।
चन्द्रोद्भासितमूर्धजां रिपुरसां मुण्डाक्षमालाकराम् ॥४॥
बालांसत्स्रकचञ्चलां मधुमदां रक्तां जटाजूटिनीं ।
शत्रुस्तम्भनकारिणीं शशिमुखीं पीताम्बरोद्भासिनीम् ॥५॥
प्रेतस्थां बगलामुखीं भगवतीं कारुण्यरूपां भजे
ॐ ह्लीं मम शिरः पातु देवी श्रीबगलामुखी ॥६॥
ॐ ऐं क्लीं पातु मे भालं देवी स्तम्भनकारिणी ।
ॐ अं इं हं भ्रुवौ पातु क्लेशहारिणी ॥७॥
ॐ हं पातु मे नेत्रे नारसिंही शुभङ्करी ।
ॐ ह्लीं श्रीं पातु मे गण्डौ अं आं इं भुवनेश्वरी ॥८॥
ॐ ऐं क्लीं सौः श्रुतौ पातु इं ईं उं च परेश्वरी ।
ॐ ह्लीं ह्लूं ह्लीं सदाव्यान्मे नासां ह्लीं सरस्वती ॥९॥
ॐ ह्रां ह्रीं मे मुखं पातु लीं एं ऐं छिन्नमस्तका ।
ॐ श्रीं वं मेऽधरौ पातु ओं औं दक्षिणकालिका ॥१०॥
ॐ क्लीं श्रीं शिरसः पातु कं खं गं घं च सारिका ।
ॐ ह्रीं ह्रूं भैरवी पातु डं अं अः त्रिपुरेश्वरी ॥११॥
ॐ ऐं सौः मे हनुं पातु चं छं जं च मनोन्मनी ।
ॐ श्रीं श्रीं मे गलं पातु झं ञं टं ठं गणेश्वरी ॥१२॥
ॐ स्कन्धौ मेऽव्याद् डं ढं णं हूं हूं चैव तु तोतला ।
ॐ ह्रीं श्रीं मे भुजौ पातु तं थं दं वरवर्णिनी ॥१३॥
ऐं क्लीं सौः स्तनौ पातु धं नं पं परमेश्वरी ।
क्रों क्रों मे रक्षयेद् वक्षः फं बं भं भगवासिनी ॥१४॥
ॐ ह्रीं रां पातु कुक्षि मे मं यं रं वह्निवल्लभा ।
ॐ श्रीं ह्रूं पातु मे पार्श्वौ लं बं लम्बोदरन् प्रसूः ॥१५॥
ॐ श्रीं ह्रीं हूं पातु मे नाभिं शं षं षण्मुखपालिनी ।
ॐ ऐं सौः पातु मे पृष्ठं सं हं हाटकरूपिणी ॥१६॥

ॐ क्लीं ऐं कटिं पातु पञ्चाशद्वर्णमालिका।
ॐ ऐं क्लीं पातु मे गुह्यं अं आं कं गुह्यकेश्वरी ॥१७॥
ॐ श्रीं ऊं ऋं सदाऽव्यान्मे इं ईं खं खां स्वरूपिणी।
ॐ जुं सः पातु मे जङ्घे रुं रूं धं अघहारिणी ॥१८॥
श्रीं ह्रीं पातु मे जानू उं ऊं णं गणवल्लभा।
ॐ श्रीं सः पातु मे गुल्फौ लिं लीं ऊं चं चण्डिका ॥१९॥
ॐ ऐं ह्रीं पातु मे वाणी एं ऐं छं जं जगत्प्रिया।
ॐ श्रीं क्लीं पातु पादौ मे झं ञं टं ठं भगोदरी ॥२०॥
ॐ ह्रीं सर्वं वपुः पातु अं अः त्रिपुरमालिनी।
ॐ ह्रीं पूर्वे सदाऽव्यान्मे झं झां डं ढं शिखामुखी ॥२१॥
ॐ सौः याम्यं सदाऽव्यान्मे इं ईं णं तं च तारिणी।
ॐ वारुण्यां च वाराही उं थं दं धं च कम्पिला ॥२२॥
ॐ श्रीं मां पातु चैशान्यां पातु ॐ नं जनेश्वरी।
ॐ श्रीं मां चाग्नेयां ऋं भं मं धं च योगिनी ॥२३॥
ॐ ऐं मां पातु नैर्ऋत्यां ऌं लं राजेश्वरी तथा।
ॐ श्रीं पातु वायव्यां ऌं लं वीतकेशिनी।
ॐ प्रभाते च मां पातु लीं लं वागीश्वरी सदा ॥२४॥
ॐ मध्याह्ने च मां पातु ऐं क्षं शङ्करवल्लभा।
श्रीं ह्रीं क्लीं पातु सायं ऐं आं शाकम्भरी सदा ॥२५॥
ॐ ह्रीं निशादौ मां पातु ॐ सं सागरवासिनी।
क्लीं निशीथे च मां पातु ॐ हं हरिहरेश्वरी ॥२६॥
क्लीं ब्राह्मो मुहूर्तेऽव्याद् लं लां त्रिपुरसुन्दरी।
विसर्गा तु यत्स्थानं वर्जितं कवचेन तु ॥२७॥
क्लीं तन्मे सकलं पातु अं क्षं ह्रीं बगलामुखी।
इतीदं कवचं दिव्यं मन्त्राक्षरमयं परम् ॥२८॥
त्रैलोक्यविजयं नाम सर्ववर्णमयं स्मृतम्।
अप्रकाश्यं सदा देवि! श्रोतव्यं च वाचिकम् ॥२९॥
दुर्जनायाकुलीनस्य दीक्षाहीनाय पार्वति।
न दातव्यं न दातव्यमित्याज्ञा पारमेश्वरी ॥३०॥
दीक्षाकार्यविहीनाय शक्तिभक्तिविरोधिने।
कवचस्यास्य पठनात् साधको दीक्षितो भवेत् ॥३१॥
कवचेशमिदं गोप्यं सिद्धविद्यामयं परम्।
ब्रह्मविद्यामयं गोप्यं यथेष्टफलदं शिवे ॥३२॥

न कस्य कथितं चैतद् त्रैलोक्यविजयेश्वरम् ।
अस्य स्मरणमात्रेण देवी सद्यो वशी भवेत् ॥३३॥
पठनाद् धारणादस्य कवचेशस्य साधकः ।
कलौ विचरते वीरो यथा श्रीबगलामुखी ॥३४॥
इदं वर्म स्मरेन्मन्त्री संग्रामे प्रविशेद् यदा ।
युयुत्सुः पठन् कवचं साधको विजयी भेवत् ॥३५॥
शत्रुं कालसमानं तु जित्वा स्वगृहमेति सः ।
मूर्ध्नि धृत्वा यः कवचं मन्त्रगर्भं सुसाधकः ॥३६॥
ब्रह्माद्यमरान् सर्वान् सहसा वशमानयेत् ।
धृत्वा गले तु कवचं साधकस्य महेश्वरि ॥३७॥
वशमायान्ति सहसा रम्भाद्यप्सरसां गणाः ।
उत्पातेषु च घोरेषु भयेषु विविधेषु च ॥३८॥
रोगेषु च कवचेशं मन्त्रगर्भं पठेन्नरः ।
कर्मणा मनसा वाचा तद्भयं शान्तिमेष्यति ॥३९॥
श्रीदेव्या बगलामुख्याः कवचेशं मयोदितम् ।
त्रैलोक्यविजयं नाम पुत्रपौत्रधनप्रदम् ॥४०॥
ऋणं च हरते सम्यक् लक्ष्मीर्भोगविवर्धिनी ।
वन्ध्या जनयते कुक्षौ पुत्ररत्नं न चान्यथा ॥४१॥
मृतवत्सा च विभूयात् कवचं च गले सदा ।
दीर्घायुर्व्याधिहीनश्च तत्पुत्रो वर्धतेऽनिशम् ॥४२॥
इतीदं बगलामुख्याः कवचेशं सुदुर्लभम् ।
त्रैलोक्यविजयं नाम न देयं यस्य कस्यचित् ॥४३॥
अकुलीनाय मूढाय भक्तिहीनाय दम्भिने ।
लोभयुक्ताय देवेशि ! न दातव्यं कदाचन ॥४४॥
लोभदम्भविहीनाय कवचेशं प्रदीयताम् ।
अभक्तेभ्यो अपुत्रेभ्यो दत्वा कुष्ठी भवेन्नरः ॥४५॥
रवौ रात्रौ च सुस्नातः पूजागृहगतः सुधीः ।
दीपमुज्ज्वाल्य मूलेन पठेद्धर्मेदमुत्तमम् ॥४६॥
प्राप्तौ सत्यां त्रिरात्रौ हि राजा तद्गृहमेष्यति ।
मण्डलेशो महेशानि देवि ! सत्यं न संशयः ॥४७॥
इदं तु कवचेशं तु मया प्रोक्तं नगात्मजे ।
गोप्यं गुह्यतरं देवि ! गोपनीयं स्वयोनिवत् ॥४८॥

रुद्रयामलोक्त-बगलाप्रत्यङ्गिराकवचम्

श्रीशिव उवाच

अधुनाऽहं प्रवक्ष्यामि बगलायाः सुदुर्लभम् ।
यस्य पठनमात्रेण पवनोऽपि स्थिरायते ॥
प्रत्यङ्गिरा तां देवेशि शृणुस्व कमलानने ।
यस्य स्मरणमात्रेण शत्रवो विलयं गताः ॥

श्रीदेव्युवाच

स्नेहोऽस्ति यदि मे नाथ ! संसारार्णवतारक ।
तथा कथय मां शम्भो बगला प्रत्यङ्गिरा मम ॥

श्रीभैरव उवाच

यं यं प्रार्थयते मन्त्री हठात्तं तमवाप्नुयात् ।
विद्वेषणाकर्षणे च स्तम्भनं वैरिणां विभो ॥
उच्चाटनं मारणं च येन कर्तुं क्षमो भवेत् ।
तत्सर्वं ब्रूहि मे देव ! यदि मां दयसे हर ॥

श्रीसदाशिव उवाच

अधुना हि महादेवि ! परानिष्ठा मतिर्भवेत् ।
अतएव महेशानि ! किञ्चिन्न वक्तुमर्हसि ॥

श्रीपार्वत्युवाच

जिघांसन्तं जिघांसीयात्र तेन ब्रह्महा भवेत् ।
श्रुतिरेषा हि गिरिश ! कथं मां त्वं निनिन्दसि ॥

श्रीशिव उवाच

साधु साधु प्रवक्ष्यामि शृणुष्वावहितानघे ।
प्रत्यङ्गिरां बगलायाः सर्वशत्रुनिवारिणीम् ॥
नाशिनीं सर्वदुष्टानां सर्वपापौघहारिणीम् ।
सर्वप्राणिहितां देवीं सर्वदुःखविनाशिनीम् ॥
भोगदां मोक्षदां चैव राज्यसौभाग्यदायिनीम् ।
मन्त्रदोषप्रमोचनीं ग्रहदोषनिवारिणीम् ॥

अस्य श्रीबगलाप्रत्यङ्गिरामन्त्रस्य नारद ऋषिस्त्रिष्टुप् छन्दः प्रत्यङ्गिरा देवता ह्लीं बीजं हूँ शक्तिः ह्लीं कीलकं ह्लीं ह्लीं ह्लीं ह्लीं प्रत्यङ्गिरा मम शत्रुविनाशे विनियोगः ।

ॐ प्रत्यङ्गिरायै नमः प्रत्यङ्गिरे सकलकामान् साधय मम रक्षां कुरु कुरु सर्वान् शत्रून् खादय खादय मारय मारय घातय घातय ॐ ह्लीं फट् स्वाहा ।

ॐ भ्रामरी स्तम्भिनी देवी क्षोभिणी मोहिनी तथा।
संहारिणी द्राविणी च जृम्भिणी रौद्ररूपिणी॥
इत्यष्टौ शक्तयो देवि! शत्रुपक्षे नियोजिताः।
धारयेत् कण्ठदेशे च सर्वशत्रुविनाशिनी॥

ॐ ह्लीं भ्रामरि सर्वशत्रून् भ्रामय भ्रामय ॐ ह्लीं स्वाहा।
ॐ ह्लीं स्तम्भिनि मम शत्रून् स्तम्भय स्तम्भय ॐ ह्लीं स्वाहा।
ॐ ह्लीं क्षोभिणि मम शत्रून् क्षोभय क्षोभय ॐ ह्लीं स्वाहा।
ॐ ह्लीं मोहिनि मम शत्रून् मोहय मोहय ॐ ह्लीं स्वाहा।
ॐ ह्लीं संहारिणि मम शत्रून् संहारय संहारय ॐ ह्लीं स्वाहा।
ॐ ह्लीं द्राविणि मम शत्रून् द्रावय द्रावय ॐ ह्लीं स्वाहा।
ॐ ह्लीं जृम्भिणि मम शत्रून् जृम्भय जृम्भय ॐ ह्लीं स्वाहा।
ॐ ह्लीं रौद्रि मम शत्रून् सन्तापय सन्तापय ॐ ह्लीं स्वाहा।

इयं विद्या महाविद्या सर्वशत्रुनिवारिणी।
धारिता साधकेन्द्रेण सर्वान् दुष्टान् विनाशयेत्॥
त्रिसन्ध्यमेकसन्ध्यं वा यः पठेत्स्थिरमानसः।
न तस्य दुर्लभं लोके कल्पवृक्ष इव स्थितः॥
यं यं स्पृशति हस्तेन यं यं पश्यति चक्षुषा।
स एव दासतां याति सारात्सारमिमं मनुम्॥

श्रीबगलामुखीशत्रुविनाशककवचम्

श्रीगणेशाय नमः। श्रीपीताम्बरायै नमः।

श्रीदेव्युवाच

नमस्ते शम्भवे तुभ्यं नमस्ते शशिशेखर।
त्वत्प्रसादादद्भुतं सर्वमधुना कवचं वद॥१॥

श्रीशिव उवाच

शृणु देवि! प्रवक्ष्यामि कवचं परमाद्भुतम्।
यस्य स्मरणमात्रेण रिपोः स्तम्भो भवेत् क्षणात्॥२॥
कवचस्य च देवेशि! महामायाप्रभावतः।
पंक्तिश्छन्दः समुद्दिष्टं देवता बगलामुखी॥३॥
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः।
ॐकारो मे शिरः पातु ह्लींकारो वदनेऽवतु॥४॥
बगलामुखि दोर्युग्मं कण्ठे सर्वं सदाऽवतु।
दुष्टानां पातु हृदयं वाचं मुखं ततः पदम्॥५॥

उदरे सर्वदा पातु स्तम्भयेति सदा मम।
जिह्वां कीलय मे मातर्बगला सर्वदाऽवतु ।।६।।
बुद्धिं विनाशय पादौ तु ह्लीं ॐ मे दिग्विदिक्षु च।
स्वाहा मे सर्वदा पातु सर्वत्र सर्वसन्धिषु ।।७।।
इति ते कथितं देवि! कवचं परमाद्भुतम्।
यस्य स्मरणमात्रेण सर्वस्तम्भो भवेत् क्षणात् ।।८।।
यद्धृत्वा विविधा दैत्या वासवेन हताः पुरा।
यस्य प्रसादात् सिद्धोऽहं हरिः सत्त्वगुणान्वितः ।।९।।
वेधा सृष्टिं वितनुते कामः सर्वजगज्जयी।
लिखित्वा धारयेद् यस्तु कण्ठे वा दक्षिणे भुजे ।।१०।।
षट्कर्मसिद्धिस्तस्याशु मम तुल्यो भवेद् ध्रुवम्।
अज्ञात्वा कवचं देवि! तस्य मन्त्रो न सिध्यति ।।११।।

वीरतन्त्रोक्त-बगलामुखीकवचम्

वीरतन्त्र के 'महोग्रताराकल्प' में भैरव-संवादात्मक एक बगलामुखीकवच विद्यमान है जो नीचे प्रस्तुत किया जा रहा है—

श्रीगणेशाय नमः। प्रथमं गुरुं ध्यायेत्।

श्रीदेव्युवाच

राज्ञां मण्डलिकादेवी बगलोपरि सर्पताम्।
सवर्णानां महादेव धनविप्लुतचेतसाम् ।।१।।
दुष्टसर्पादिजन्तूनां स्तम्भनं वद शङ्कर।

श्रीभैरव उवाच

पुरा कृतयुगे देवि! वातक्षोभ उपस्थिते ।।१।।
महार्णवानामेकत्वे गते क्षोभं भयं ययुः।
सेन्द्राः स वैष्णवाः सर्वे सभयं मामुपस्थिताः ।।२।।
शिव शङ्कर रुद्रेश रक्षाऽस्मान् शरणागतान्।
महावातादिसंक्षोभभयादस्मान् महार्णवात् ।।३।।
तच्छ्रुत्वाहं महेशानि कवचं पूर्वनिर्मितम्।
दत्तवान् सर्वदेवेभ्यो महाभयनिकृन्तनम् ।।४।।
कवचं बगलामुख्याः शिवप्राणप्रदं महत्।
पूर्वं भस्माऽसुरत्रासाद् भयव्याकुलितः स्वयम् ।।५।।
पच्यन्ते तेन मत्प्राणास्तान् ररक्ष महेश्वरी।
शिवप्राणप्रदं तस्य विश्रुतं रक्षकं परम् ।।६।।

ॐ अस्य श्रीबगलामुखीकवचस्य श्रीभैरव ऋषिः, उष्णिक् छन्दः, अद्वैतरूपिणी महास्तम्भनकारिणी श्रीपीताम्बरा देवी, स्थिरमाया बीजं, स्वाहा शक्तिः, प्रणवः कीलकम्, मम दूरस्थानां समीपस्थानां सर्वदुष्टानां वाक्पदगतिमुखस्तम्भनार्थं, परसैन्यपरमन्त्रयन्त्रस्तम्भनार्थं, सर्वराजकुलमोहनार्थं, सर्वकामिनीजनवश्यार्थं श्रीबगलामुखीप्रीत्यर्थे जपे विनियोगः ।

ॐ ह्लां हृदयाय नमः, ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लूं शिखायै वषट्, ॐ ह्लैं कवचाय हुम्, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः अस्त्राय फट् ।

इसी प्रकार न्यास भी करना चाहिए ।

ध्यान

मध्ये सुधाब्धिमणिमण्डितरत्नवेद्यां
सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराऽभरणमाल्यविभूषिताङ्गीं
देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥
षट्त्रिंशदक्षरा विद्या बगला पातु मे शिरः ।
सहस्रारे गुरुः पातु शक्त्या परमयोज्ज्वलः ॥८॥
चिद्रूपा परमा शक्तिर्ललाटं शिवगेहिनी ।
भ्रूयुग्मं मे महाकाली नेत्रे मे परमेश्वरी ॥९॥
कर्णयुग्मं पीतपुष्पप्रिया मे पातु कपोलयोः ।
चिबुके परमा शक्तिरोष्ठयोः परमा कला ॥१०॥
वदनं सकलं पातु परब्रह्मस्वरूपिणी ।
पीतपुष्पार्चिता कण्ठं स्कन्धौ स्कन्दस्तनप्रदा ॥११॥
पीताम्बरा दक्षभुजां वामे वामाङ्गधारिणी ।
हृदयं च स्तनद्वन्द्वं नाभिं विश्वस्वरूपधृक् ॥१२॥
उदरं दुर्धरा मेऽव्यात् कटिं कन्दर्परूपधृक् ।
नितम्बौ नमिता देशे देवता जघनं रमा ॥१३॥
जङ्घायुग्ममनाधारा जानुनी जन्तुरूपिणी ।
ऊरू धर्मप्रदा मेऽव्याद् गुल्फे गगनरूपधृक् ॥१४॥
पादौ तु कूर्मरूपा सा पातु पादाङ्गुलीस्तथा ।
शिरसः पादपर्यन्तं पातु मां परमा कला ॥१५॥
गणेशरूपिणी मेऽव्यादाधारं सच्चतुर्दलम् ।
स्वाधिष्ठानं षड्दलं पातु मे ब्रह्मरूपधृक् ॥१६॥
मणिपूरे दशदले पातु केशवरूपिणी ।
हृत्पङ्कजे शैवभक्तिविशुद्धं जीवरूपिणी ॥१७॥

आज्ञाचक्रे बिन्दुरूपा परब्रह्मकुटुम्बिनी।
ब्रह्मरन्ध्रसहस्रारे पङ्कजे स्वच्छरूपिणी ॥१८॥
पातु मां परमा शक्तिश्चमरी कुटिलालका।
षट्त्रिंशदक्षरा विद्या पीता पीतवपुर्धरा ॥१९॥
पीतपुष्पार्चिता पीतनैवेद्याऽपि बलिप्रिया।
सर्वाङ्गे मे शुभा पातु वैरिस्तम्भनकारिणी ॥२०॥
ब्रह्मरन्ध्रं तु परमा संसारार्णवतारिणी।
मां तारयेत् महादेवी मनोवाञ्छितदायिनी ॥२१॥
आज्ञाचक्रे गुरुरूपा महाभयविनाशिनी।
सर्वविद्याप्रदा पातु जिह्वां शास्त्रवपुर्धरा ॥२२॥
विशुद्धे षोडशदले जीवेश्वरवपुर्धरा।
षट्त्रिंशत्तत्त्वरूपा सा कण्ठस्था मां शिवाऽवतु ॥२३॥
हृत्पङ्कजे भवानी सा हृद्यरूपा परात्मिका।
स्वकीयानां महाशत्रून् विदारय विदारय ॥२४॥
मणिपूरे दशदले महाविष्णुस्वरूपिणी।
दारयत्यखिलान् लोकान् महामाया परा तु सा ॥२५॥
प्रजापतिस्वरूपेयं स्वाधिष्ठाने तु षड्दले।
सृष्टिस्थितिपरा विद्या मां पातु बगलामुखी ॥२६॥
गणेशरूपधृक् पातु ममाधारे चतुर्दले।
षोडशस्वररूपेण पातु मां परमा कला ॥२७॥
कं खं गं घं तथा ङं चं छं जं झं ञं तथाऽवतु।
ऋं टं ठं डं ढं तथा णं तं थं दं धं तथाऽवतु ॥२८॥
नं पं फं तु शत्रुभ्यः पीतां मां ध्यानतत्परम्।
बं भं मं यं विदारय शत्रून् मे वाक्स्वरूपिणी ॥२९॥
रं लं वं शं तथा षं सं शत्रोर्जिह्वां विदारय।
मे वाचं मे मुखं जिह्वां सदा रक्षतु रक्षतु ॥३०॥
हं ळं क्षं सकलं पातु रक्ष मे परमं यशः।
प्रणवं स्थिरमायां च तृतीयं कान्तिरूपिणी ॥३१॥
या तृतीयस्वरा युग्मं पादाद्यं स्वरपङ्कजम्।
द्विस्तृतीयं दक्षनेत्रं सर्वदुष्ट बहुस्मृतम् ॥३२॥
द्वितीयं कीलयेति च तथा बुद्धिं विनाशय।
षष्ठ्या वाचं मुखं पदं स्तम्भयाथोऽपि जिह्वया ॥३३॥
स्थिरमाया तथा तारं चान्ते वह्निवधूप्रिया।
एषा विद्या महाविद्या शत्रुस्तम्भनकारिणी ॥३४॥

त्रिधा मन्त्रं तथोच्चार्य सर्वाङ्गे व्यापकं कुरु।
जयत्येव न सन्देहः शत्रून् घोरान् महाहवे ॥३५॥
कुलालमृत्तिका ग्राह्या वामहस्तेन दीपकम्।
कृत्या प्रज्ज्वाल्य तैलेन वाऽग्रे स्थाप्यं ततो जपेत् ॥३६॥
त्रिरात्रे स्तम्भयत्येव शत्रुसेनां महाहवे।
गौरवर्णां पीतपुष्पैर्बालां सम्पूज्य वामतः ॥३७॥
न्यासान् विधाय तद्देहे जायायोगे जपेन्मनुम्।
पीतोपचारैस्तां शक्तिं सन्तोष्य परिवारणात् ॥३८॥
वशयत्येव लोकेशं किं पुनः क्षुद्रमानुषम्।
वाचः स्तम्भनकामस्तु वीरशक्तिं शुभाननाम् ॥३९॥
षोडशाष्टसुवर्णाद्यैरलङ्कृत्य भजन् शिवाम्।
सहस्त्रं मूलमन्त्रं तु जप्त्वा वाचस्पतेरपि ॥४०॥
स्तम्भयत्यैव परमां वाचं किं पुनः क्षुद्रमानुषम्।
वशीकरणकामस्तु बद्ध्वा परिकरं दृढम् ॥४१॥
शक्तिलिङ्गोपरि स्थाप्या त्रिसहस्त्रं जपेन्मनुम्।
इन्द्राणीं वशयत्येव किं पुनः क्षुद्रमानुषीम् ॥४२॥
मण्डलाधीशं वशीकुर्याच्चोत्तराभिमुखः स्थितः।
सुन्दरीं षोडशीं शुभ्रां स्वाननां च शुचिस्मिताम् ॥४३॥
तत्कुचौ च करे धृत्वा पीताद्यां हसिताननाम्।
लिङ्गे संस्थाप्य सञ्चुम्बन् मुखं पीतामनु जपेत् ॥४४॥
त्रिसहस्त्रे महाराजं वशयत्येव नाऽन्यथा।
कृष्णाष्टमी समारभ्य यावत् कृष्णचतुर्दशी ॥४५॥
नियतं तु सहस्त्रं च शापाऽनुग्रहसिद्धये।
येन केनाप्युपायेन बगलाभक्तितत्परः ॥४६॥
स्तम्भयेत् सकलान् देवान् वशयत्येव शङ्करम्।
मारयेच्छत्रुसङ्घातं चालयेत् पर्वतानपि ॥४७॥
देवान् स्थापयते चैन्द्रे दृष्ट्वा ज्वरविनाशनम्।
स्तम्भितं चैकधा देवि! तत् सकृच्चासकृज्जपन् ॥४८॥
एका सा परमा विद्या महाशत्रुविदारिणी।
नास्तिके तस्करे दुष्टे मूढे पण्डितमानिनि ॥४९॥
न देया दुर्जने विद्या शुभोदयमवाप्नुयात्।
सुशीलाय सुदातव्या गुरुभक्तिपराय च ॥५०॥
विशुद्धाय महामन्त्रजापिने देयमुत्तमम्।
अस्य पार्वतीमाहात्म्यकवचस्य वरानने ॥५१॥

महेन्द्रादौ रणे वाते प्रलये पर्युपस्थिते।
स्तम्भिता चैकधा देवि ! स्मृत्वा तं सकृज्जपात् ॥५२॥
कृत्वा पुरा तु कवचं जपेन्मन्त्रं समाहितः।
नान्यथा स्तम्भिनी विद्या सिद्धिः स्यादिति निश्चयम् ॥५३॥
(श्रीवीरतन्त्र : महोग्रताराकल्प)

●

गायत्री-विधान

बगलामुखीगायत्री

सांख्यायनतन्त्र के द्वादश पटल में गायत्री-विधान मिलता है। क्रौंचभेदन के प्रश्न के उत्तर में भगवान् शिव (ईश्वर) कहते हैं—

क्रौञ्चभेदन उवाच

नमस्ते सर्वसर्वेश गर्विताऽसुरभञ्जन।
गायत्रीं बगलाख्यां च वद मे करुणाकर॥

ईश्वर उवाच

मन्त्रोद्धारं प्रवक्ष्यामि मन्त्रमाहात्म्यमेव च।
पुरश्चर्याप्रयोगं च वक्ष्येऽहं तव पुत्रक॥
ब्रह्मास्त्राय पदं चोक्त्वा विद्महेति पदं तथा।
स्तम्भनेति पदं चोक्त्वा तन्नः शब्दं ततो वदेत्॥
बगलापदमुच्चार्यमुद्धरेच्च प्रचोदयात्।
गायत्री बगला नाम्नी सर्वसिद्धिप्रदा भुवि॥
ब्रह्मा ऋषिश्छन्दश्च गायत्र्यं समुदाहृतम्।
देवता बगलानाम्नी चिन्मयी शक्तिरूपिणी॥
ॐ बीजं ह्रीं शक्तिः कीलकं विद्महे पदम्।
चतुर्लक्षं पुरश्चर्या तद्दशांशं च तर्पणम्॥
तद्दशांशं हुनेदाज्यं तावद् ब्राह्मणभोजनम्।
न्यासं ध्यानादिकं सर्वं कुर्यात्तन्मन्त्रराजवत्॥
प्रयोगानथ वक्ष्यामि गायत्र्या बगलाह्वयाम्।
तारादि प्रजपेन्मन्त्रं मोक्षार्थी च कुमारक॥
कामार्थी प्रजपेन्मन्त्रं तारवाराहपूर्वकम्।
सम्मोहनार्थं प्रजपेत् कामराजपुरःसरम्॥
स्तम्भनार्थी जपेत् पुत्र बगलाबीजपूर्वकम्।
विद्वेषणादौ प्रजपेत् हुङ्कारद्वयपूर्वकम्॥
उच्चाटनार्थं प्रजपेत् शक्तिवाराहपूर्वकम्।

वाराहशक्तिं वाराहं तच्च मायापुरःसरम् ।।
प्रजपेन्मन्त्रमेतद्धि मारणं भवति ध्रुवम् ।
वाग्भवादि जपेन्मन्त्रं विद्यासिद्धिर्भविष्यति ।।
बालादि प्रजपेन्मन्त्रं कन्यकां क्षितिमाप्नुयात् ।
वाराहीबीजमध्यस्थगायत्रीलक्षजापतः ।।
मूलाभो जायते तस्य अनायासेन पुत्रक ।
श्रीबीजादिं जपेत्पुत्र गायत्रीं बगलाह्वयाम् ।।
कुबेरसदृशः श्रीमान् जायते नात्र संशयः ।
तार्क्ष्यबीजादिकं मन्त्रं प्रजपेद् ध्यानपूर्वकम् ।।
नानाविषप्रयोगांश्च गररोगाऽऽदिनाशनम् ।
भैरवं बीजमादाय प्रजपेच्च कुमारक ।।
भूतप्रेतपिशाचाद्यास्तत्प्रयोगाद् व्यपोहति ।
जपेदमृतबीजादिं गायत्रीं बगलाह्वयाम् ।।
तापज्वरमहातापाच्छान्तिमाप्नोति पुत्रक ।
जपेच्च वायुबीजादिं गायत्रीं बगलाह्वयाम् ।।
क्षिप्रमुच्चाटनं तस्य भवेच्छङ्करभाषितम् ।
अग्निबीजादिगायत्रीं प्रजपेद् बगलाह्वयाम् ।।
तापेन महताऽऽविष्टः पश्चाच्छत्रुर्मृतो भवेत् ।
मायादिं प्रजपेन्मन्त्रं गायत्रीं बगलाह्वयाम् ।।
राजा वा राजपुत्रो वा मरणान्तवशो भवेत् ।
महामायादिगायत्रीं प्रजपेद् बगलाह्वयाम् ।।
इष्टसिद्धिर्भवेत्तस्य शिवस्य वचनं यथा ।
मन्त्रराजस्य गायत्रीं पादाद्यवयवां तथा ।।
गायत्रीं च विना मन्त्रो न सिध्यति कलौ युगे ।
पुरश्चरणकाले तु गायत्रीं प्रजपेन्नरः ।।
मूलविद्यादशांशं च मन्त्रसिद्धिर्भवेद् ध्रुवम् ।
त्यक्त्वा तां मन्त्रगायत्रीं यो जपेन्मन्त्रमादरात् ।।
कोटिकोटिजपेनाऽपि तस्य सिद्धिर्न जायते ।
जपसंख्या यत्र नोक्ता लक्षमेकं कुमारक ।।
दिनसंख्या यत्र नोक्ता पक्षमेकं न संशयः ।
गायत्री बगलानाम्नी बगलायाश्च जीवनम् ।।
मन्त्रादौ चाथ मन्त्रान्ते जपेद् ध्यानपुरःसरम् ।

बगलोपासना में बगलागायत्री का महत्त्व

बगलागायत्री का स्वरूप—

गायत्री बगलानाम्नी सर्वसिद्धिप्रदा भुवि।
ब्रह्मा ऋषिश्छन्दश्च गायत्र्यं समुदाहृतम्॥
देवता बगलानाम्नी चिन्मयी शक्तिरूपिणी।
ॐ बीजं ह्लीं शक्तिः कीलकं विद्महे पदम्॥
चतुर्लक्षं पुरश्चर्या तद्दशांशं च तर्पणम्।
तद्दशांशं हुनेदाज्यं तावद् ब्राह्मणभोजनम्॥

महत्त्व—

गायत्रीं च विना मन्त्रो न सिद्ध्यति कलौ युगे।
पुरश्चरणकाले तु गायत्रीं प्रजपेन्नरः॥
त्यक्त्वा तां मन्त्रगायत्रीं यो जपेन्मन्त्रमादरात्।
कोटिकोटिजपेनापि तस्य सिद्धिर्न जायते॥

(सांख्यायनतन्त्र १२।२५-२७)

●

बगलामुखी-पटल

(१) 'बगलामुखी व्याख्यास्यामः' ॥१॥
(हम बगलामुखी की व्याख्या करते हैं।)

(२) 'अष्टमी सा दशसु महाविद्यासु' ॥२॥
(वह महाविद्याओं में आठवीं (महाविद्या) है।)

(३) 'स्तम्भनशक्तिर्बगलामुखी' ॥३॥
(बगलामुखी स्तम्भनशक्ति है।)

(४) 'अध्यात्मं सा शङ्खिन्यां नाड्याम्' ॥४॥
(वह शङ्खिनी नाड़ी में आत्मा सहित स्थित है।)

(५) 'अधिलोकं पितृयाने पथि' ॥५॥
(पितृयान के मार्ग में उसका लोक है।)

(६) 'दण्डनाथा काचन मध्यमाया अधिदैवतम्' ॥६॥
(कोई मध्यमा की अधिष्ठात्री देवता 'दण्डनाथा' कहते हैं।)

(७) 'रिपुस्तम्भनकामो बगलामुखीमुपासीत्' ॥७॥
(शत्रु के स्तम्भन की कामना रखने वाला व्यक्ति बगलामुखी की उपासना करे।)

(८) 'अन्त:शत्रुस्तम्भनकामो वा' ॥८॥
(या आन्तरिक (काम-क्रोधादिक) शत्रुओं का स्तम्भन करने की आकांक्षा रखने वाले बगलामुखी की उपासना करे।)

(९) 'खेन्द्राग्निशान्तिचन्द्रै: संयुक्तै:' ॥९॥
('ख' (अर्थात् 'ह'), 'इन्द्र' (अर्थात् 'ल'), 'अग्नि' (अर्थात् 'र'), 'शान्ति' (अर्थात 'ई'), 'चन्द्र' (अर्थात् ँ)—इन सबके संयुक्त रूप के द्वारा निर्मित अक्षर अर्थात् बीज एकाक्षर मन्त्र 'ह्ल्रीं' से।)

(१०) 'शुद्धमुपासनमिन्द्रयोनिविद्यया' ॥१०॥
('इन्द्रयोनिविद्या' के द्वारा शुद्ध उपासना होती है।)

(११) 'इन्द्रयोनिश्च जिह्वामूले लम्बमानं तैजसं लिङ्गम्। तल्लक्ष्य ध्यानं तद् विद्या' ॥१॥
(इन्द्रयोनि अर्थात् जिह्वामूल में लम्ब भाव से सुस्थित तैजस लिङ्ग है। उसे लक्ष्य करके ध्यान करना ही यह विद्या है।)

(१२) 'अन्तर्वायुसञ्चारनिरोधेन वा' ॥१२॥
(अथवा अन्तर्वायु का सञ्चार रोक कर अर्थात् कुम्भक प्राणायाम के द्वारा।)

(१३) 'तं हठयोगमाहु:' ॥१३॥
(उसे हठयोग कहते हैं।)

(१४) 'यो वायुं स्तम्भयेत् स सर्वं स्तम्भयेत्' ॥१४॥
(जो वायु का स्तम्भन करता है वह सबका स्तम्भन कर देता है।)

बगलाहृदय के पाठ का वैशिष्ट्य

बगलोपासना में 'बगलाहृदय' के पाठ की महत्ता यह है कि यदि मात्र बगलाहृदय का ही पाठ कर लिया जाय तो फिर साधक को—ध्यान, होम, जप, तर्पण इत्यादि की कोई आवश्यकता नहीं रह जाती। लिखा तो यहाँ तक गया है कि—

(१) इसके श्रवण मात्र से मन्त्र सिद्ध हो जाता है।

(२) इसका एक बार भी उच्चारण कर लिये जाने से सारे अभीष्ट पूरे हो जाते हैं।

(३) इसका स्मरण कर लेने मात्र से समस्त कार्यसिद्धि हो जाने के कारण अभिषेक, मन्त्रदीक्षा, शास्त्रविधि, कालावधि, कालविधि आदि सभी निरर्थक हैं।

(४) बगलाहृदय का मन्त्र ब्रह्मादिकादि के लिए भी दुर्लभ है। इसके सकृत् स्मरण मात्र से सारे वाञ्छित अभीष्ट निष्पादित हो जाते हैं।

(५) पङ्गु चलने लगता है।

(६) मूक बोलने लगता है।

(७) दरिद्र धनी हो जाता है।

(८) निन्दित व्यक्ति भी कीर्तिमान् हो जाता है।

(९) उन्मादी व्यक्ति भी कवीश्वर हो जाता है।

(१०) बगलाहृदय मन्त्र के सकृत्पाठी का उल्लङ्घन करने मात्र से ब्रह्मा भी सकुशल नही रह सकते। बगलाहृदय परम सन्तोष प्रदान करता है और सिद्धियाँ देता है, अतः इसका जप अवश्य करना चाहिए—

'येन केनोपायेन क्रौञ्चभेदन तच्छृणु।
हृन्मत्रं जपते येन वाञ्छितं फलमाप्नुयात्'॥

इसके लिए ध्यानादिक की अनिवार्यता भी नहीं है—

'न ध्यानं न च होमश्च न जपो न च तर्पणम्।
सकृदुच्चारणान्मन्त्रं चिन्तितं च भवेद् ध्रुवम्॥
न चाभिषेको न च मन्त्रदीक्षा, न वा विधिः कालविधिश्च देवता।
× × × × × ×
दरिद्रो भवति श्रीमान् स्तब्धो भवति पण्डितः।
चतुरो मुखरश्चैव कीर्तिवान्निन्दितो भवेत्'॥

(सांख्यायनतन्त्र)

बगलामुखी-पटल

अथ प्रवक्ष्ये शत्रूणां स्तम्भिनीं बगलामुखीम्।
प्रणवो गगनं पृथिवी शान्तिबिन्दुर्युतं बग॥१॥
ला मु साक्षो गदी सर्वदुष्टानां वा हलीन्दुयुक्।
मुदं पदं स्तम्भयान्ते जिह्वां कीलय वर्णकाः॥२॥
बुद्धिं विनाशयान्ते तु बीजं तारोऽग्निसुन्दरी।
षट्त्रिंशदक्षरो मन्त्रः नारदो मुनिरस्य तु॥३॥
छन्दस्तु बृहती शेषं देवता बगलामुखी।
नेत्राक्षसायकनवपञ्चकाष्ठाभिरङ्गकम् ॥४॥

ध्यान

सौवर्णासनसंस्थितां त्रिनयनां पीतांशुकोल्लासिनीं
हेमाभाङ्गरुचिं शशाङ्कमुकुटां सच्चम्पकस्रग्युताम्।
हस्तैर्मुद्गरपाशवज्ररसनाः सम्बिभ्रतीं भूषणै-
र्व्याप्ताङ्गीं बगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तयेत्॥५॥
एवं ध्यात्वा जपेल्लक्षमयुतं चम्पकोद्भवैः।
कुसुमैर्जुहुयात् पीठे पूर्वोक्ते पूजयेदिमाम्॥६॥

चन्दनागुरुचन्द्राद्यैः पूजार्थं यन्त्रमालिखेत् ।
त्रिकोणषड्दलाष्टास्त्रषोडशारधरा पुरे ॥७॥
मध्ये सम्पूजयेद् देवीं कोणे सत्त्वादिकान् गुणान् ।
षट्कोणेषु षडङ्गानि मातृभैरवसंयुताः ॥८॥
सम्पूज्याऽष्टदले पद्मे षोडशारे यजेदिमाः ।
मङ्गला स्तम्भिनी चैव जृम्भिणी मोहिनी तथा ॥९॥
वश्या बला बलाका च भूधरा कल्मषाऽभिधा ।
धात्री च कलना कालकर्षिणी भ्रामिकाऽपि च ॥१०॥
मन्दगमना भोगस्था भाविका षोडशी स्मृता ।
भूगृहस्य चतुर्दिक्षु पूर्वाऽऽदिषु यजेत् क्रमात् ॥११॥
गणेशं बटुकं चापि योगिनीं क्षेत्रपालकम् ।
इन्द्रादींश्च ततो बाह्ये निजाऽऽयुधसमन्वितान् ॥१२॥
इत्थं सिद्धमनुर्मन्त्री स्तम्भयेद् देवताऽऽदिकान् ।
पीतवस्त्रस्तदासीनः पीतमाल्याऽनुलेपनः ॥१३॥
पीतपुष्पैर्यजेद्देवीं हरिद्रोत्थस्त्रजा जपन् ।
पीतां ध्यायन् भगवतीं प्रयोगेष्वयुतं जपेत् ॥१४॥
त्रिमध्वाऽऽज्यतिलैर्होमो नृणां वश्यकरो मतः ।
मधुरत्रितयाक्तैः स्यादाकर्षो लवणैर्ध्रुवम् ॥१५॥
तैलाभ्यक्तैर्निम्बपत्रैर्होमो विद्वेषकारकः ।
ताललवणहरिद्राभिर्द्विषां संस्तम्भनं भवेत् ॥१६॥
अङ्गारधूमं राजीश्च माहिषं गुग्गुलं निशि ।
श्मशानपावके हुत्वा नाशयेदचिरादरीन् ॥१७॥
गरुतो गृद्ध्रकाकानां कटुतैलबिभीतकम् ।
गृहधूमचितावह्नौ हुत्वा प्रोच्चाटयेद् रिपून् ॥१८॥
दूर्वागुडूचीलाजान् यो मधुरत्रितयाऽन्वितान् ।
जुहोति सोऽखिलान् रोगान् शमयेद् दर्शनादपि ॥१९॥
पर्वताग्रे महारण्ये नदीसङ्गे शिवालये ।
ब्रह्मचर्यरतो लक्षं जपेदखिलसिद्धये ॥२०॥
एकवर्णगवीदुग्धं शर्करामधुसंयुतम् ।
त्रिशतं मन्त्रितं पीतं हन्याद् विषपराभवम् ॥२१॥
श्वेतपालाशकाष्ठेन रचिते रम्यपादुके ।
असक्तरञ्जिते लक्षं मन्त्रयेन्मनुनाऽमुना ॥२२॥
तदारूढः पुमान् गच्छेत् क्षणेन शतयोजनम् ।
पारदं च शिला तालं पिष्टं मधुसमन्वितम् ॥२३॥

मनुना मन्त्रयेल्लक्षं लिम्पेत्तेनाऽखिलां तनुम् ।
अदृश्यः स्यान्नृणामेष आश्चर्य दृश्यतामिदम् ।।२४।।
षट्कोणे विलिखेद्बीजं साध्यनामान्वितं मनोः ।
हरितालनिशाचूर्णैरुन्मत्तरससंयुतैः ।।२५।।
शेषाऽक्षरैः समा बीजं धरागेहविराजितम् ।
तद्यन्त्रं स्थापितप्राणपीतसूत्रेण वेष्टयेत् ।।२६।।
भ्राम्यत्कुलालचक्रस्थां गृहीत्वा मृत्तिकां तथा ।
रचयेद् वृषभं रम्यं यन्त्रं तन्मध्यतः क्षिपेत् ।।२७।।
हरितालेन संलिप्य वृषभं प्रत्यहमर्चयेत् ।
स्तम्भयेद् विद्विषां वाचं गतिं कार्यं परम्पराम् ।।२८।।
आदाय वामहस्तेन प्रेतभूमिस्थखर्परम् ।
अङ्गारेण चितास्थेन तत्र यन्त्रं समालिखेत् ।।२९।।
मन्त्रितं निहितं भूमौ रिपूणां स्तम्भयेद् गतिम् ।
प्रेतवस्त्रे लिखेद् यन्त्रमङ्गारेण च तत्पुनः ।।३०।।
मण्डूकवदने न्यस्येत् पीतसूत्रेण वेष्टयेत् ।
पूजितं पीतपुष्पैस्तद् वाचं संस्तम्भयेद् द्विषाम् ।।३१।।
यद्भूमौ भविता दिव्यं तत्र यन्त्रं समालिखेत् ।
मार्जितं तद् वृषापत्रैर्दिव्यस्तम्भनकृद् भवेत् ।।३२।।
इन्द्रवारुणिकामूलं सप्तांशो मनुमन्त्रितम् ।
क्षिप्तं जले दिव्यकृत्तं जलस्तम्भनकारकम् ।।३३।।
किं भूरिणा साधकेन मन्त्रः सम्यगुपासितः ।
शत्रूणां गतिबुद्ध्यादेः स्तम्भनो नात्र संशयः ।।३४।।

●

सिद्धेश्वरतन्त्रोक्त-बगलाहृदयस्तोत्रम्

ॐ अस्य श्रीबगलामुखीहृदयमालामन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, श्रीबगलामुखी देवता, ह्लीं बीजं, क्लीं शक्तिः, ऐं कीलकं, श्रीबगलामुखीवरप्रसादसिद्ध्यर्थे जपे विनियोगः ।

अथ न्यासः—ॐ नारदऋषये नमः शिरसि, ॐ अनुष्टुप्छन्दसे नमो मुखे, ॐ श्रीबगलामुख्यै देवतायै नमः हृदये, ॐ ह्लीं बीजाय नमो गुह्ये, ॐ क्लीं शक्तये नमः पादयोः, ॐ ऐं कीलकाय नमः सर्वाङ्गे ।

अथ कराङ्गन्यासौ । ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ क्लीं तर्जनीभ्यां नमः, ॐ ऐं मध्यमाभ्यां नमः, ॐ ह्लीं अनामिकाभ्यां नमः, ॐ क्लीं कनिष्ठिकाभ्यां नमः, ॐ ऐं करतलकरपृष्ठाभ्यां नमः । ॐ ह्लीं हृदयाय नमः । ॐ क्लीं शिरसे स्वाहा । ॐ ऐं शिखायै वषट् । ॐ ह्लीं कवचाय हुम् । ॐ क्लीं नेत्रत्रयाय वौषट् । ॐ ऐं अस्त्राय फट् । ॐ ह्लीं क्लीं ऐं इति दिग्बन्धः ।

पीताम्बरां पीतमाल्यां पीताभरणभूषिताम् ।
पीतकञ्जपदद्वन्द्वां बगलां चिन्तयेऽनिशम् ॥

इति ध्यात्वा सम्पूज्य च—

पीतशङ्खगदाहस्ते पीतचन्दनचर्चिते ।
बगले मे वरं देहि शत्रुसङ्घविदारिणि ॥

इति सम्प्रार्थ्य 'ॐ ह्लीं क्लीं ऐं बगलामुख्यै गदाधारिण्यै प्रेतासनाध्यासिन्यै स्वाहा' इति मन्त्रं जपित्वा पुनः पूर्ववद् हृदयादिषडङ्गन्यासं कृत्वा स्तोत्रं पठेत् तद् यथा—

वन्देऽहं बगलां देवीं पीतभूषणभूषिताम् ।
तेजोरूपमयीं देवीं पीततेजःस्वरूपिणीम् ॥१॥
गदाभ्रमणभिन्नाभ्रां भृकुटीभीषणाननाम् ।
भीषयन्तीं भीमशत्रून् भजे भव्यस्य भक्तिदाम् ॥२॥
पूर्णचन्द्रसमानास्यां पीतगन्धानुलेपनाम् ।
पीताम्बरपरीधानां पवित्रामाश्रयाम्यहम् ॥३॥
पालयन्तीमनुपलं प्रसमीक्ष्याऽवनीतले ।
पीताचाररतां भक्तांस्ताम्भवानीं भजाम्यहम् ॥४॥
पीतपद्मपदद्वन्द्वां चम्पकारण्यरूपिणीम् ।
पीतावतंसां परमां वन्दे पद्मजवन्दिताम् ॥५॥
लसच्चारुसिञ्जत्सुमञ्जीरपादां
चलत्स्वर्णकर्णावतंसाञ्चिता स्याम् ।
वलत्पीतचन्द्राननां चन्द्रवन्द्यां
भजे पद्मजादीऽयसत्पादपद्माम् ॥६॥
सुपीताभयामालया पूतमन्त्रं
परं ते जपन्तो जयं संलभन्ते ।
रणे रागरोषाप्लुतानां रिपूणां
विवादे बलाद्वैरकृदघातमातः ॥७॥
भरत्पीतभास्वत्प्रभाहस्कराभां
गदागञ्जितामित्रगर्वां गरिष्ठाम् ।
गरीयो गुणागारगात्रां गुणाढ्यां
गणेशादिगम्यां श्रये निर्गुणाढ्याम् ॥८॥
जना ये जपन्त्युग्रबीजं जगत्सु
परं प्रत्यहं ते स्मरन्तः स्वरूपम् ।
भवेद् वादिनां वाङ्मुखस्तम्भ आद्ये
जयो जायते जल्पतामाशु तेषाम् ॥९॥

तव ध्याननिष्ठाप्रतिष्ठात्मप्रज्ञा-
वतां पादपद्मार्चने प्रेमयुक्ताः ।
प्रसन्ना नृपाः प्राकृताः पण्डिता वा
पुराणादिका दासतुल्या भवन्ति ॥१०॥
नमामस्ते मातः कनककमनीयाङ्घ्रिजलजं
बलद्विद्युद्वर्णां घनतिमिरविध्वंसकरणम् ।
भवाब्धौ मग्नात्मोत्तरणकरणं सर्वशरणम्
प्रपन्नानां मातर्जगति बगले दुःखदमनम् ॥११॥
ज्वलज्ज्योत्स्नारत्नाकरमणिविषक्ताङ्कभवनं
स्मरामस्ते धाम स्मरहरहरीन्द्रेन्दुप्रमुखैः ।
अहोरात्रं प्रातः प्रणयनवनीयं सुविशदम्
परं पीताकारं परिचितमणिद्वीपवसनम् ॥१२॥
वदामस्ते मातः श्रुतिसुखकरं नाम ललितं
लसन्मात्रावर्णं जगति बगलेति प्रचरितम् ।
चलन्तस्तिष्ठन्तो वयमुपविशन्तोऽपि शयने
भजामो यच्छ्रेयो दिवि दुरवलभ्यं दिविषदाम् ॥१३॥
पदार्चायां प्रीतिः प्रतिदिनमपूर्वा प्रभवतु
यथा ते प्रासन्न्यं प्रतिपलमपेक्ष्यं प्रणमताम् ।
अनल्पं तन्मातर्भवति भृतभक्त्या भवतु नो
दिशातः सद्भक्तिं भुवि भगवतां भूरि भवदाम् ॥१४॥
मम सकलरिपूणां वाङ्मुखे स्तम्भयाशु
भगवति रिपुजिह्वां कीलय प्रस्थतुल्याम् ।
व्यवसितखलबुद्धिं नाशयाऽशु प्रगल्भाम्
मम कुरु बहुकार्यं सत्कृपेऽम्ब प्रसीद ॥१५॥
व्रजतु मम रिपूणां सद्मनि प्रेतसंस्था
करधृतगदया तान् घातयित्वाऽशु रोषात् ।
सधनवसनधान्यं सद्म तेषां प्रदह्य
पुनरपि बगला स्वस्थानमायातु शीघ्रम् ॥१६॥
करधृतरिपुजिह्वापीडनं व्यग्रहस्ताम्
पुनरपि गदया तांस्ताडयन्तीं सुतन्त्राम् ।
प्रणतसुरगणानां पालिकां पीतवस्त्रां
बहुबलबगलान्तां पीतवस्त्रां नमामः ॥१७॥
हृदयवचनकायैः कुर्वतां भक्तिपुञ्जं
प्रकटति करुणार्द्रां प्रीणति जल्पतीति ।

धनमथ बहुधान्यं पुत्रपौत्रादिवृद्धिः
सकलमपि किमेभ्यो देयमेवं त्ववश्यम् ॥१८॥
तव चरणसरोजं सर्वदा सेव्यमानं
द्रुहिणहरिहराद्यैर्देववृन्दैः शरण्यम्।
मृदुलमपि शरं ते शर्मदं सूरिसेव्यं
वयमिह करवामो मातरेतद् विधेयम् ॥१९॥
बगलाहृदयस्तोत्रमिदं भक्तिसमन्वितः।
पठेद् यो बगला तस्य प्रसन्ना पाठतो भवेत् ॥२०॥
पीताध्यानपरो भक्तो यः श्रिणोत्यविकल्पतः।
निष्कल्मषो भवेन्मर्त्यो मृतो मोक्षमवाप्नुयात् ॥२१॥
आश्विनस्य सिते पक्षे महाष्टम्यां दिवानिशम्।
यस्त्विदं पठते प्रेम्णा बगलाप्रीतिमेति सः ॥२२॥
देव्यालये पठन्मर्त्यो बगलां ध्यायतीश्वरीम्।
पीतवस्त्रावृतो यस्तु तस्य नश्यन्ति शत्रवः ॥२३॥
पीताचाररतो नित्यं पीतभूषां विचिन्तयन्।
बगलायाः पठेन्नित्यं हृदयस्तोत्रमुत्तमम् ॥२४॥
न किञ्चिद्दुर्लभं तस्य दृश्यते जगतीतले।
शत्रवो ग्लानिमायान्ति तस्य दर्शनमात्रतः ॥२५॥

●

भगवती बगलामुखी के अष्टोत्तरशतनाम

विष्णुयामलोक्त बगलाऽष्टोत्तरशतनामस्तोत्रम्

श्रीनारद उवाच

भगवन्! देवदेवेश! सृष्टिस्थितिलयात्मकम्।
शतमष्टोत्तरं नाम्नां बगलाया वदाऽधुना ॥१॥

श्रीभगवानुवाच

शृणु वत्स! प्रवक्ष्यामि नाम्नामष्टोत्तरं शतम्।
पिताम्बर्या महादेव्याः स्तोत्रं पापप्रणाशनम् ॥२॥
यस्य प्रपठनात् सद्यो वादी मूको भवेत् क्षणात्।
रिपूणां स्तम्भनं याति सत्यं सत्यं वदाम्यहम् ॥३॥

ॐ अस्य पीताम्बर्यष्टोत्तरशतनामस्तोत्रस्य सदाशिव ऋषिः, अनुष्टुप् छन्दः, श्रीपीताम्बरी देवता, श्रीपीताम्बरीप्रीतये जपे विनियोगः।

ॐ बगला विष्णुवनिता विष्णुशङ्करभामिनी।
बहुला वेदमाता च महाविष्णुप्रसूरपि ॥१॥

महामत्स्या महाकूर्मा महावाराहरूपिणी ।
नरसिंहप्रिया रम्या वामना बटुरूपिणी ॥२॥
जामदग्न्यस्वरूपा च रामा रामप्रपूजिता ।
कृष्णा कपर्दिनी कृत्या कलहा कलविकारिणी ॥३॥
बुद्धिरूपा बुद्धिभार्या बौद्धपाखण्डखण्डिनी ।
कल्किरूपा कलिहरा कलिदुर्गतिनाशिनी ॥४॥
कोटिसूर्यप्रतीकाशा कोटिकन्दर्पमोहिनी ।
केवला कठिना काली कलाकैवल्यदायिनी ॥५॥
केशवी केशवाराध्या किशोरी केशवस्तुता ।
रुद्ररूपा रुद्रमूर्ती रुद्राणी रुद्रदेवता ॥६॥
नक्षत्ररूपा नक्षत्रा नक्षत्रेशप्रपूजिता ।
नक्षत्रेशप्रिया नित्या नक्षत्रपतिवन्दिता ॥७॥
नागिनी नागजननी नागराजप्रवन्दिता ।
नागेश्वरी नागकन्या नागरी च नगात्मजा ॥८॥
नगाधिराजतनया नगराजप्रपूजिता ।
नवीना नीरदा पीता श्यामा सौन्दर्यकारिणी ॥९॥
रक्ता नीला घना शुभ्रा श्वेता सौभाग्यदायिनी ।
सुन्दरी सौभगा सौम्या स्वर्णाभा स्वर्गतिप्रदा ॥१०॥
रिपुत्रासकरी रेखा शत्रुसंहारकारिणी ।
भामिनी च तथा माया स्तम्भिनी मोहिनी शुभा ॥११॥
रागद्वेषकरी रात्री रौरवध्वंसकारिणी ।
यक्षिणी सिद्धनिवहा सिद्धेशा सिद्धिरूपिणी ॥१२॥
लङ्कापतिध्वंसकरी लङ्केशरिपुवन्दिता ।
लङ्कानाथकुलहरा महारावणहारिणी ॥१३॥
देवदानवसिद्धौघपूजिता परमेश्वरी ।
पराऽणुरूपा परमा परतन्त्रविनाशिनी ॥१४॥
वरदा वरदाऽऽराध्या वरदानपरायणा ।
वरदेशप्रिया वीरा वीरभूषणभूषिता ॥१५॥
वसुदा बहुदा वाणी ब्रह्मरूपा वरानना ।
बलदा पीतवसना पीतभूषणभूषिता ॥१६॥
पीतपुष्पप्रिया पीतहरा पीतस्वरूपिणी ।
इति ते कथितं विप्र नाम्नामष्टोत्तरं शतम् ॥१७॥
यः पठेत् पाठयेद् वाऽपि शृणुयाद् वा समाहितः ।
तस्य शत्रुः क्षयं सद्यो याति वै नात्र संशयः ॥१८॥

प्रभातकाले प्रयतो मनुष्यः पठेत् सुभक्त्या परिचिन्त्य पीताम् ।
द्रुतं भवेत् तस्य समस्तवृद्धिर्विनाशमायाति च तस्य शत्रुः ॥१९॥

◆

रुद्रयामलोक्त-बगलाष्टोत्तरशतनामस्तोत्रम्

ब्रह्मास्त्ररूपिणी देवी माता श्रीबगलामुखी ।
चिच्छक्तिर्ज्ञानरूपा च ब्रह्मानन्दप्रदायिनी ॥१॥
महाविद्या महालक्ष्मीः श्रीमत् त्रिपुरसुन्दरी ।
भुवनेशी जगन्माता पार्वती सर्वमङ्गला ॥२॥
ललिता भैरवी शान्ता अन्नपूर्णा कुलेश्वरी ।
वाराही छिन्नमस्ता च तारा काली सरस्वती ॥३॥
जगत्पूज्या महामाया कामेशी भगमालिनी ।
दक्षपुत्री शिवाङ्कस्था शिवरूपा शिवप्रिया ॥४॥
सर्वसम्पत्करी देवी सर्वलोकवशङ्करी ।
वेदविद्या महापूज्या भक्ताद्वेषी भयङ्करी ॥५॥
स्तम्भरूपा स्तम्भिनी च दुष्टस्तम्भनकारिणी ।
भक्तप्रिया महाभोगा श्रीविद्या ललिताम्बिका ॥६॥
मैनापुत्री शिवानन्दा मातङ्गी भुवनेश्वरी ।
नारसिंही नरेन्द्रा च नृपाराध्या नरोत्तमा ॥७॥
नागिनी नागपुत्री च नागराजसुता उमा ।
पीताम्बा पीतपुष्पा च पीतवस्त्रप्रिया शुभा ॥८॥
पीतगन्धप्रिया रामा पीतरत्नार्चिता शिवा ।
अर्द्धचन्द्रधरी देवी गदामुद्गरधारिणी ॥९॥
सावित्री त्रिपदा शुद्धा सद्योरागविवर्धिनी ।
विष्णुरूपा जगन्मोहा ब्रह्मरूपा हरिप्रिया ॥१०॥
रुद्ररूपा रुद्रशक्तिश्चिन्मयी भक्तवत्सला ।
लोकमाता शिवा सन्ध्या शिवपूजनतत्परा ॥११॥
धनाध्यक्षा धनेशी च धर्मदा धनदा धना ।
चण्डदर्पहरी देवी शुम्भासुरनिबर्हिणी ॥१२॥
राजराजेश्वरी देवी महिषासुरमर्दिनी ।
मधुकैटभहन्त्री च रक्तबीजविनाशिनी ॥१३॥
धूम्राक्षदैत्यहन्त्री च भण्डासुरविनाशिनी ।
रेणुपुत्री महामाया भ्रामरी भ्रमराम्बिका ॥१४॥
ज्वालामुखी भद्रकाली बगला शत्रुनाशिनी ।
इन्द्राणी इन्द्रपूज्या च गुहमाता गुणेश्वरी ॥१५॥

वज्रपाशधरा देवी जिह्वामुद्गरधारिणी ।
भक्तानन्दकरी देवी बगला परमेश्वरी ॥१६॥
अष्टोत्तरशतं नाम्नां बगलायास्तु यः पठेत् ।
रिपुबाधाविनिर्मुक्तः लक्ष्मीस्थैर्यमवाप्नुयात् ॥१७॥
भूतप्रेतपिशाचाश्च ग्रहपीडानिवारणम् ।
राजानो वशमायान्ति सर्वैश्वर्यं च विन्दति ॥१८॥
नानाविद्यां च लभते राज्यं प्राप्नोति निश्चितम् ।
भुक्तिमुक्तिमवाप्नोति साक्षात् शिवसमो भवेत् ॥१९॥

बगलामुखीस्तोत्र

विनियोग—इस स्तोत्र का पाठ करने के पूर्व यथाविधान विनियोग पढ़कर जल छोड़े—

ॐ अस्य श्रीबगलामुखीस्तोत्रस्य भगवान्नारद ऋषिः, बगलामुखी देवता, मनसन्निहितानां दुष्टानां विरोधिनां वाङ्मुखपदजिह्वाबुद्धीनां स्तम्भनार्थे श्रीबगलामुखीप्रसाद-सिद्ध्यर्थे जपे विनियोगः ।

करन्यास—ॐ ह्लीं अङ्गुष्ठाभ्यां नमः । ॐ बगलामुखि तर्जनीभ्यां नमः । ॐ सर्वदुष्टानां मध्यमाभ्यां वषट् । ॐ वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुम् । ॐ जिह्वां कीलय कनिष्ठिकाभ्यां वौषट् । ॐ बुद्धिं विनाशय ह्लीं स्वाहा करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यास—ॐ ह्लीं हृदयाय नमः । ॐ बगलामुखि शिरसे स्वाहा । ॐ सर्वदुष्टानां शिखायै वषट् । ॐ वाचं मुखं पदं स्तम्भय कवचाय हुं । ॐ जिह्वां कीलय नेत्रत्रयाय वौषट् । ॐ बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट् ।

ध्यान—

सौवर्णासनसंस्थितां त्रिनयनां पीतांशुकोल्लासिनीं
हेमाभाङ्गरुचिं शशाङ्कमुकुटां स्रक्चम्पकस्रग्युताम् ।
हस्तैर्मुद्गरपाशबद्धरसनां सम्बिभ्रतीं भूषणै-
र्व्याप्ताङ्गीं बगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तये ॥१॥

अर्थात् स्वर्ण के सिंहासन पर आसीन, त्रिनेत्रा, पीताम्बरा, स्वर्ण कान्ति वाली, चन्द्रकिरीटधारिणी, चम्पा पुष्प की माला पहने हुए, हाथ में मुद्गर एवं पाश लिये हुए तथा शत्रु की जिह्वा खींचे हुए, प्रत्येक शरीराङ्ग को आभूषणों से अलंकृत करके लोकत्रय को स्तम्भित किये हुए भगवती बगलामुखी का मैं चिन्तन (ध्यान) करता हूँ ।

मन्त्र—ॐ ह्लीं बगलामुखि ! सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा ।

ब्रह्मास्त्रमहाविद्यास्तोत्र[१]

ॐ मध्ये सुधाब्धिमणिमण्डपरत्नवेद्यां सिंहासनोपरिगतां परिपीतवर्णाम्।
पीताम्बराभरणमाल्यविभूषिताङ्गीं, देवीं भजामि धृतमुद्गरवैरिजिह्वाम् ॥१॥

अमृत के समुद्र के मध्य मणियों से सुसज्जित मैं मण्डप में स्थित एवं रत्नजटित वेदी पर स्थित (स्वर्ण) सिंहासन पर समासीन, पीतवर्ण वाली एवं पीताम्बरा, सर्वाभरणभूषिताङ्गी तथा हाथ से शत्रु की जिह्वा एवं मुद्गर धारण किये हुए स्थित भगवती बगलामुखी का मै भजन करता हूँ।

जिह्वाग्रमादाय करेण देवीं, वामेन शत्रून् परिपीडयन्तीम्।
गदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां भजामि ॥२॥

बायें हाथ से शत्रुजिह्वा का अग्रभाग पकड़कर दक्षिण हाथ से मुद्गर से शत्रु को पीड़ित करती हुई, द्विभुजा एवं पीताम्बरा भगवती बगलामुखी का मैं भजन करता हूँ।

चलत्कनककुण्डलोल्लसितचारुमण्डस्थलीं
लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम्।
गदाहतविपक्षकाङ्क्लितलोलजिह्वाञ्चलां
स्मरामि बगलामुखीं विमुखवाङ्मयस्तम्भिनीम् ॥३॥

काञ्चन कुण्डलों के कम्पन होने से सुशोभित कपोलों वाली, स्वर्णप्रिया एवं चम्पा पुष्प (या स्वर्ण द्वारा निर्मित लगने वाले चम्पा पुष्प) की द्युति से कान्तिमान्, चन्द्रबिम्ब सदृश मुख वाली, अपनी गदा से शत्रु को आहत करने वाली, शत्रु की चञ्चल जिह्वा को नष्ट करने वाली तथा उसकी वाणी, मन एवं मुख को नष्ट करने वाली भगवती बगलामुखी का चिन्तन (स्मरण) करता हूँ।

पीयूषोदधिमध्यचारुविलसद्रक्तोत्पले मण्डपे
सत्सिंहासनमौलिपातितरिपुं प्रेतासनाऽध्यासिनीम्।
स्वर्णाभाङ्करपीडितारिरसनां भ्राम्यद्गदां विभ्रमा-
मित्थं ध्यायति यान्ति तस्य विलयं सद्योऽद्य सर्वापदः ॥४॥

अमृत-पयोनिधि के मध्य रक्तारविन्दों के मण्डप में मनोज्ञ सिंहासन पर समासीन, शत्रुओं के शिरों को गिराने वाली, प्रेतासन पर आसीन, स्वर्ण की आभा से युक्त, शत्रु की जिह्वा को पीड़ित करने वाली, गदा को घुमाती हुई भगवती पीताम्बरा बगलामुखी का ध्यान करने मात्र से समस्त आपत्तियों का क्षण मात्र में ध्वंस हो जाता है। मैं ऐसी पीताम्बरा का ध्यान करता हूँ।

देवि! त्वच्चरणाम्बुजार्चनकृते यः पीतपुष्पाञ्जलीन्
भक्त्या वामकरे निधाय च पुनः मन्त्रं मनोज्ञाक्षरम्।

---

[१] श्रीब्रह्मास्त्रमहाविद्या स्तोत्र की श्लोक-संख्या अड़तीस है। यहाँ ग्रन्थ-गौरव के भय से कतिपय श्लोक ही उद्धृत किये गये हैं।

पीठध्यानपरोऽथ कुम्भकवशाद्बीजं स्मरेत् पार्थिवः
तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत् तत्क्षणात् ॥५॥

हे देवी ! जो लोग भक्ति के साथ आपके श्रीचरणों की अर्चा करने में पीतपुष्पों की अञ्जलि समर्पित करते हैं और स्पष्टाक्षरों से मन्त्र का ध्यान करते हैं तथा कुम्भकपूर्वक आपके बीजमन्त्रों का चिन्तन करते हैं उन लोगों को शत्रुजन्य वाणी-मन-हृदयगत समस्त पीड़ाएँ तत्क्षण नष्ट हो जाती हैं।

वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति
क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति।
गर्वी खर्वति सर्वविच्च जडति त्वद्यन्त्रणा यन्त्रितः
श्रीर्नित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं वचः ॥६॥

हे भगवती ! आपके यन्त्रणा से यन्त्रित शत्रु की वाणी मूक हो जाती है, राजा भी रङ्क हो जाता है, प्रज्वलित वैश्वानर शीतल हो जाता है, क्रोधी का क्रोध शान्त हो जाता है, दुर्जन सज्जन बन जाता है, वेगवान् पङ्गु हो जाता है, अभिमानी का गर्व भङ्ग हो जाता है और सर्वज्ञ शत्रु भी जड़ हो जाता है। हे कल्याणी ! हे लक्ष्मी ! हे नित्यसत्त्वा बगलामुखी ! मैं आपको अभिवादन करता हूँ।

मन्त्रस्यात्मबलविपक्षदलनं स्तोत्रं पवित्रं च ते
यन्त्रं वादिनियन्त्रणं त्रिजगतां जैत्रं च चित्रं च ते।
मातः श्रीबगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे
त्वन्नामग्रहणेन संसदि मुखस्तम्भो भवेद्वादिनाम् ॥७॥

हे अम्बे ! आपकी आत्मशक्ति से शत्रुओं का दलन हो जाता है। आपका स्तोत्र अत्यधिक शुचि है, वादी-समूह को नियन्त्रित करने वाला है और विचित्र त्रैलोक्य को जीतने वाला है। हे भगवती ! आपका यह अत्यन्त सुन्दर बगलामुखी नाम जिस भी प्राणी के मुख में निवास करता है या जो प्राणी आपका तथा आपके इस मन्त्र का ध्यान करता है उसके शत्रुओं के मुख का अवश्य स्तम्भन हो जाता है।

दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणम्
भूभृद्भीशमनं चलन्मृगदृशाञ्चेतः समाकर्षणम्।
सौभाग्यैकनिकेतनं समदृशां कारुण्यपूर्णाऽमृतम्
मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः ॥८॥

हे जननी ! दुष्टों को स्तम्भित करने वाला, दुर्निवार्य प्रत्यूहों को नष्ट करने वाला, दारिद्र्य को दूर करने वाला, नृपतियों के भय को विनष्ट करने वाला तथा सौभाग्यदायक भवन, करुणा से भरा अमृतस्वरूप मृत्यु का नाशक आपका शरीर सामने प्रकट हो।

मातर्भञ्जय मे विपक्षवदनं जिह्वां च सङ्कीलय
ब्राह्मीं मुद्रय नाशयाशुधिषणामुग्रां गतिं स्तम्भय।

शत्रूंश्चूर्णय देवि ! तीक्ष्णगदया गौराङ्गि ! पीताम्बरे !
विघ्नौघं बगले ! हर प्रणमतां कारुण्यपूर्णेक्षणे ॥९॥

हे माता ! मेरे शत्रु के मुख को तोड़ डालिए, उसकी जिह्वा को कीलित कर दीजिए, उसकी समस्त बुद्धि के विकास को नष्ट कर डालिए तथा उसकी वाणी एवं शीघ्र गति का शीघ्र स्तम्भन कीजिए। हे देवी बगले ! आप अपने कठोर गदा-प्रहार से शत्रुओं को चूर्ण कर डालिए। हे कारुण्यपूर्णनेत्री भगवती बगलामुखी ! आप मुझ प्रणत एवं अभिवादनपरायण भक्त के विघ्न-समूह का ध्वंस कीजिए।

मातर्भैरवि ! भद्रकालि ! विजये ! वाराहि ! विश्वाश्रये !
श्रीविद्ये ! समये ! महेशि ! बगले ! कामेशि ! रामे ! रमे !
मातङ्गि ! त्रिपुरे ! परात्परतरे ! स्वर्गापवर्गप्रदे
दासोऽहं शरणागतः करुणया विश्वेश्वरि ! त्राहि माम् ॥१०॥

हे माता ! हे भैरवी ! हे भद्रकाली ! हे विजये ! हे वाराही ! हे विश्वाश्रये ! हे लक्ष्मी ! हे श्री ! हे विद्ये ! हे समये ! हे महेशि ! हे बगले ! हे कामेशि ! हे रमे ! हे रामे ! मातङ्गि ! हे त्रिपुरसुन्दरी ! हे परात्परपरे ! हे स्वर्गापवर्गप्रदे ! हे विश्वेश्वरि ! मैं आपका दास हूँ और आपके शरणात हूँ ! देवि ! आप अपनी करुणा से मेरी रक्षा कीजिए।

फलश्रुति—

युद्ध में, चोरों के समूह में, प्रहार के काल में, बन्धन में, जल के मध्य में, शास्त्रार्थ में, विवाद में, राजा के कुपित होने पर, रात्रि के समय, दिव्यकाल में, वशीकरण के काल में, स्तम्भन-काल में, निर्जन स्थान में, वन में, चलते-बैठते हर काल में जो इस स्तोत्र का त्रिकाल पाठ पूर्ण भक्तिभावपूर्वक करता है वह धैर्यवान् व्यक्ति निश्चय ही शीघ्र कल्याण की प्राप्ति करता है।

नित्यं स्तोत्रमिदं पवित्रमिह यो देव्याः पठत्यादराद्
धृत्वा यन्त्रमिदं तथैव समरे बाहौ करे वा गले।
राजानोऽप्यरयो मदान्धकरिणः सर्पा मृगेन्द्रादिका-
स्ते वै यान्ति विमोहितां रिपुगणाः लक्ष्मीः स्थिरां सिद्धयः ॥१२॥

जो व्यक्ति नित्यप्रति इस पवित्र स्तोत्र का श्रद्धापूर्वक पाठ करता है, इस यन्त्र तथा मन्त्र को अपनी भुजा एवं कण्ठ में धारण करता है उसके समक्ष राजा, शत्रु, मतवाला हस्ती, सर्प एवं सिंह सभी वशीभूत हो जाते हैं। उसके शत्रु स्वयं मोहित हो उठते हैं। उसकी लक्ष्मी एवं सिद्धियाँ भी स्थिर हो जाती हैं।

त्वं विद्या परमा त्रिलोकजननी विघ्नौघविच्छेदिनी
कोषाकर्षणकारिणी त्रिजगतामानन्दसंवर्धिनी।

दुष्टोच्चाटनकारिणी जनमनस्सम्मोहसन्दायिनी
जिह्वाकीलन भैरवि ! विजयते ब्रह्मादिमन्त्रो यथा ।।१३।।

हे जननी ! तुम परमा विद्या हो, तुम तीनों लोकों की माता हो, तुम विघ्नसमूह की विनाशिनी हो, तुम कोपाकर्षण की सूत्रधार हो, तुम लोकत्रय में आनन्द का संवर्धन करने वाली हो, तुम दुष्टों का उच्चाटन करने वाली हो और तुम जनमन को सम्मोहित करने वाली हो। शत्रुओं की जिह्वा को कीलित करने वाली हे बगला देवी ! जिस प्रकार ब्रह्मा आदि त्रिदेवों का मन्त्र सदैव विजय प्रदान करता है उसी प्रकार आपका मन्त्र भी सभी क्षेत्रों में विजय प्राप्त करता है—अर्थात् साधकों को विजय प्राप्त कराता है।

विद्या लक्ष्मी: सर्वसौभाग्यमायु: पुत्रै: पौत्रै: सर्वसाम्राज्यसिद्धि: ।
मानं भोगो वश्यमारोग्यसौख्यं प्राप्तं तत्तद्भूतलेऽस्मिन्नरेण ।।१४।।

बगलासहस्रनामस्तोत्र

सुरालयप्रधाने तु देवदेवं महेश्वरम् ।
शैलाधिराजतनया संग्रहे तमुवाच ह ।।१।।

श्रीदेव्युवाच

परमेष्ठिन् ! परं धाम ! प्रधान ! परमेश्वर !
नाम्नां सहस्रं बगलामुख्यायं ब्रूहि वल्लभ ।।२।।

ईश्वर उवाच

शृणु देवि ! प्रवक्ष्यामि नामधेयं सहस्रकम् ।
परब्रह्मास्त्रविद्यायाश्चतुर्वर्गफलप्रदम् ।।३।।
गुह्याद् गुह्यतरं देवि ! सर्वसिद्धैकवन्दितम् ।
अतिगुप्ततरा विद्या सर्वतन्त्रेषु गोपिता ।।४।।
विशेषत: कलियुगे महासिद्ध्यौघदायिनी ।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नत: ।।५।।
अप्रकाश्यमिदं सत्यं स्वयोनिरिव सुव्रते ।
रोधिनी विघ्नसङ्घानां मोहिनी परयोषिताम् ।।६।।
स्तम्भिनी राजसैन्यानां वादिनी परवादिनाम् ।
पुरा चैकार्णवे घोरे काले परमभैरव: ।।७।।
सुन्दरीसहितो देव: केशव: क्लेशनाशन: ।
उरगासनमासीनो योगनिद्रामुपागमत् ।।८।।
निद्राकाले च ते काले मया प्रोक्त: सनातन: ।
महास्तम्भकरं देवि ! स्तोत्रं वा शतनामकम् ।।९।।

सहस्रनाम परमं वद देवस्य कस्यचित् ।

श्रीभगवानुवाच

शृणु शङ्कर देवेश ! परमातिरहस्यकम् ॥१०॥
अतोऽहं यत्प्रसादेन विष्णुः सर्वेश्वरेश्वरः ।
गोपनीयं प्रयत्नेन प्रकाशात् सिद्धिहानिकृत् ॥११॥

विनियोगः

ॐ अस्य श्रीपीताम्बरीसहस्रनामस्तोत्रमन्त्रस्य भगवान् सदाशिव ऋषिः, अनुष्टुप् छन्दः, श्रीजगद्वश्यकरी पीताम्बरी देवता सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

ध्यानम्—

पीताम्बरपरीधानां पीनोन्नतपयोधराम् ।
जटामुकुटशोभाढ्यां पीतभूमिसुखासनाम् ॥१२॥
शत्रोर्जिह्वां मुद्गरं च बिभ्रतीं परमां कलाम् ।
सर्वागमपुराणेषु विख्यातां भुवनत्रये ॥१३॥
सृष्टिस्थितिविनाशानामादिभूतां महेश्वरीम् ।
गोप्या सर्वप्रयत्नेन शृणु तां कथयामि ते ॥१४॥
जगद्विध्वंसिनीं देवीमजराऽमरकारिणीम् ।
तां नमामि महामायां महदैश्वर्यदायिनीम् ॥१५॥
प्रणवं पूर्वमुद्धृत्य स्थिरमायां ततो वदेत् ।
बगलामुखी सर्वेति दुष्टानां वाचमेव च ॥१६॥
मुखं पदं स्तम्भयेति जिह्वां कीलय बुद्धिमत् ।
विनाशयेति तारं च स्थिरमायां ततो वदेत् ॥१७॥
वह्निप्रियां ततो मन्त्रश्चतुर्वर्गफलप्रदः ।
ब्रह्मास्त्रब्रह्मविद्या च ब्रह्ममाता सनातनी ॥१८॥
ब्रह्मेशी ब्रह्मकैवल्यं बगला ब्रह्मचारिणी ।
नित्यानन्दा नित्यसिद्धा नित्यरूपा निरामया ॥१९॥
सन्धारिणी महामाया कटाक्षक्षेमकारिणी ।
कमला विमला नीला रत्नकान्तिगुणाश्रिता ॥२०॥
कामप्रिया कामरता कामकामस्वरूपिणी ।
मङ्गला विजया जाया सर्वमङ्गलकारिणी ॥२१॥
कामिनी कामिनीकाम्या कामुका कामचारिणी ।
कामप्रिया कामरता कामाकामस्वरूपिणी ॥२२॥
कामाख्या कामबीजस्था कामपीठनिवासिनी ।
कामदा कामहा काली कपाली च करालिका ॥२३॥

कंसारि: कमला कामा कैलासेश्वरवल्लभा।
कात्यायनी केशवा च करुणा कामकेलिभुक् ॥२४॥
क्रिया कीर्ति: कृत्तिका च काशिका मधुरा शिवा।
कालाक्षी कालिका काली धवलाननसुन्दरी ॥२५॥
खेचरी च खमूर्तिश्च क्षुद्राऽक्षुद्रक्षुधावरा।
खड्गहस्ता खड्गरता खड्गिनी खर्परप्रिया ॥२६॥
गङ्गा गौरी गामिनी च गीता गोत्रविवर्द्धिनी।
गोधरा गोकरा गोधा गन्धर्वपुरवासिनी ॥२७॥
गन्धर्वा गन्धर्वकला गोपनी गरुडासना।
गोविन्दभावा गोविन्दा गान्धारी गन्धमादिनी ॥२८॥
गौराङ्गी गोपिकामूर्तिर्गोपी गोष्ठनिवासिनी।
गन्धा गजेन्द्रगामान्या गदाधरप्रिया ग्रहा ॥१९॥
घोरघोरा घोररूपा घनश्रोणी घनप्रभा।
दैत्येन्द्रप्रबला घण्टावादिनी घोरनिस्वना ॥३०॥
डाकिन्युमा उपेन्द्रा च उर्वशी उरगासना।
उत्तमा उन्नता उन्ना उत्तमस्थानवासिनी ॥३१॥
चामुण्डा मुण्डिका चण्डी चण्डदर्पहरेति च।
उग्रचण्डा चण्डचण्डा चण्डदैत्यविनाशिनी ॥३२॥
चण्डरूपा प्रचण्डा च चण्डाचण्डशरीरिणी।
चतुर्भुजा प्रचण्डा च चराचरनिवासिनी ॥३३॥
क्षत्रप्राय: शिवोवाहा छलाछलतरा छली।
क्षत्ररूपा क्षत्रधरा क्षत्रियक्षयकारिणी ॥३४॥
जया च जयदुर्गा च जयन्ती जयदापरा।
जायिनी जयिनी ज्योत्स्ना जटाधरप्रिया जिता ॥३५॥
जितेन्द्रिया जितक्रोधा जयमाना जनेश्वरी।
जितमृत्युर्जरातीता जाह्नवी जनकात्मजा ॥३६॥
झङ्कारा झञ्झरी झण्टा झङ्कारी झकशोभिनी।
झखा झमेशा झङ्कारी योनिकल्याणदायिनी ॥३७॥
झर्झरा झमुरी झारा झराझरतरापरा।
झञ्झा झमेता झङ्कारी झणाकल्याणदायिनी ॥३८॥
ईमना मानसी चिन्त्या ईमुना शङ्करप्रिया।
टङ्कारी टिटिका टीका टङ्किनी च टवर्गका ॥३९॥
टापा टोपा टटपतिष्टमनी टमनप्रिया।
ठकारधारिणी ठीका ठङ्करी ठिकरप्रिया ॥४०॥

ठेकठासा ठकरती ठामिनी ठमनप्रिया ।
डारहा डाकिनी डारा डामरा डामरप्रिया ।।४१।।
डखिनी डडयुक्ता च डमरूकरवल्लभा ।
ढक्का ढक्की ढक्कनादा ढोलशब्दप्रबोधिनी ।।४२।।
ढामिनी ढामनप्रीता ढगतन्त्रप्रकाशिनी ।
अनेकरूपिणी अम्बा अणिमासिद्धिदायिनी ।।४३।।
आमन्त्रिणी अणुकरी अणुमद्भानुसंस्थिता ।
तारा तन्त्रावती तन्त्रा तत्त्वरूपा तपस्विनी ।।४४।।
तरङ्गिणी तत्त्वपरा तान्त्रिका तन्त्रविग्रहा ।
तपोरूपा तत्त्वदात्री तप:प्रीतिप्रधर्षिणी ।।४५।।
तन्त्रा यन्त्रार्चनपरा तलातलनिवासिनी ।
तल्पदा स्वल्पदा कामा स्थिरा स्थिरतरा स्थिति: ।।४६।।
स्थाणुप्रिया स्थितिपरा लतास्थानप्रदायिनी ।
दिगम्बरा दयारूपा दावाग्निदमनी दमा ।।४७।।
दुर्गा दुर्गपरा देवी दुष्टदैत्यविनाशिनी ।
दमनप्रमदा दैत्यदयादानपरायणा ।।४८।।
दुर्गार्तिनाशिनी दान्ता दम्भिनी दम्भवर्जिता ।
दिगम्बरप्रिया दम्भा दैत्यदम्भविदारिणी ।।४९।।
दमना दशनसौन्दर्या दानवेन्द्रविनाशिनी ।
दयाधरा च दमनी दर्भपत्रविलासिनी ।।५०।।
धारिणी धारिणी धात्री धराधरधरप्रिया ।
धराधरसुता देवी सुधर्मा धर्मचारिणी ।।५१।।
धर्मज्ञा धवला धूला धनदा धनवर्द्धिनी ।
धीरा धीरा धीरतरा धीरसिद्धिप्रदायिनी ।।५२।।
धन्वन्तरिधरा धीरा ध्येया ध्यानस्वरूपिणी ।
नारायणी नारसिंही नित्यानन्दा नरोत्तमा ।।५३।।
नक्ता नक्तवती नित्या नीलजीमूतसन्निभा ।
नीलाङ्गी नीलवस्त्रा च नीलपर्वतवासिनी ।।५४।।
सुनीलपुष्पखचिता नीलजम्बुसमप्रभा ।
नित्याख्या षोडशी विद्या नित्याऽनित्यसुखावहा ।।५५।।
नर्मदा नन्दना नन्दा नन्दाऽऽनन्दविवर्द्धिनी ।
यशोदानन्दतनया नन्दनोद्यानवासिनी ।।५६।।
नागान्तका नागवृद्धा नागपत्नी च नागिनी ।
नमिताशेषजनता नमकारवती नम: ।।५७।।

पीताम्बरा पार्वती च पीताम्बरविभूषिता ।
पीतमाल्याम्बरधरा पीताभा पिङ्गमूर्द्धजा ॥५८॥
पीतपुष्पार्चनरता पीतपुष्पसमर्चिता ।
परप्रभा पितृपतिः परसैन्यविनाशिनी ॥५९॥
परमा परतन्त्रा च परमन्त्रा परात्परा ।
पराविद्या परासिद्धिः परस्थानप्रदायिनी ॥६०॥
पुष्पा पुष्पवती नित्या पुष्पमालाविभूषिता ।
पुरातना पूर्वपरा परसिद्धिप्रदायिनी ॥६१॥
पीता नितम्बिनीपीता पीनोन्नतपयस्तनी ।
प्रेमा प्रमध्यमा शेषा पद्मपत्रविलासिनी ॥६२॥
पद्मावती पद्मनेत्रा पद्मा पद्ममुखी परा ।
पद्मासना पद्मप्रिया पद्मरागस्वरूपिणी ॥६३॥
पावनी पालिका पात्री परदा वरदा शिवा ।
प्रेतसंस्था परानन्दा परब्रह्मस्वरूपिणी ॥६४॥
जिनेश्वरप्रिया देवी पशुरक्तरतप्रिया ।
पशुमांसप्रिया पर्णा परामृतपरायणा ॥६५॥
पाशिनी पाशिका चापि पशुघ्नी पशुभाषिणी ।
कुल्लारविन्दवदनी कुल्लोत्पलशरीरिणी ॥६६॥
परानन्दाप्रदा वीणा पशुपाशविनाशिनी ।
फुत्कारा फुत्परा फेणी फुल्लेन्दीवरलोचना ॥६७॥
फट्मन्त्रा स्फटिका स्वाहा स्फोटा च फट्स्वरूपिणी ।
स्फाटिका घुटिका घोरा स्फटिकाद्रिस्वरूपिणी ॥६८॥
वराङ्गना वरधरा वाराही वासुकी वरा ।
बिन्दुस्था बिन्दुनी वाणी बिन्दुचक्रनिवासिनी ॥६९॥
विद्याधरी विशालाक्षी काशीवासिजनप्रिया ।
वेदविद्या विरूपाक्षी विश्वयुग् बहुरूपिणी ॥७०॥
ब्रह्मशक्तिर्विष्णुशक्तिः पञ्चवक्त्रा शिवप्रिया ।
वैकुण्ठवासिनी देवी वैकुण्ठपददायिनी ॥७१॥
ब्रह्मरूपा विष्णुरूपा परब्रह्ममहेश्वरी ।
भवप्रिया भवोद्भावा भवरूपा भवोत्तमा ॥७२॥
भवपारा भवाधारा भाग्यवत्प्रियकारिणी ।
भद्रा सुभद्रा भवदा शुम्भदैत्यविनाशिनी ॥७३॥
भवानी भैरवी भीमा भद्रकाली सुभद्रिका ।

श्लोक क्र. ७४ से ८० तक के ७ श्लोक इसमें इसलिए प्रकाशित नहीं किये जा रहे हैं क्योंकि उनकी अशिष्ट शब्दावली को देखकर ऐसा लगता है कि तन्त्र को बदनाम करने के लिए इन्हें किसी ने बाद में जोड़ दिया है। इसके लिए पाठक क्षमा करें।

(लेखक)

माधवी माधवीमान्या मधुरा मधुमानिनी ।।८०।।
मन्दहासा महामाया मोहिनी महदुत्तमा।
महामोहा महाविद्या महाघोरा महास्मृतिः ।।८१।।
मनस्विनी मानवती मोदिनी मधुरानना।
मेनिका मानिनी मान्या मणिरत्नविभूषणा ।।८२।।
मल्लिका मौलिका माला मालाधरमदोत्तमा।
मदना सुन्दरी मेधा मधुमत्ता मधुप्रिया ।।८३।।
मत्तहंसा समोन्नासा मत्तसिंहमहासनी।
महेन्द्रवल्लभा भीमा मौल्यं च मिथुनात्मजा ।।८४।।
महाकाल्या महाकाली मनोबुद्धिर्महोत्कटा।
माहेश्वरी महामाया महिषासुरघातिनी ।।८५।।
मधुरा कीर्तिमत्ता च मत्तमातङ्गगामिनी।
मदप्रिया मांसरता मत्तयुक् कामकारिणी ।।८६।।
मैथुन्यवल्लभा देवी महानन्दा महोत्सवा।
मरीचिर्मारतिर्माया मनोबुद्धिप्रदायिनी ।।८७।।
मोहा मोक्षा महालक्ष्मीर्महत्पदप्रदायिनी।
यमरूपा च यमुना जयन्ती च जयप्रदा ।।८८।।
याम्या यमवती युद्धा यदोः कुलविवर्द्धिनी।
रमा रामा रामपत्नी रत्नमाला रतिप्रिया ।।८९।।
रत्नसिंहासनस्था च रत्नाभरणमण्डिता।
रमणी रमणीया च रत्या रसपरायणा ।।९०।।
रतानन्दा रतवती रघूणां कुलवर्द्धिनी।
रमणारिपरिभ्राज्या रैधा राधिकरत्नजा ।।९१।।
रावी रसस्वरूपा च रात्रिराजसुखावहा।
ऋतुजा ऋतुदा ऋद्धा ऋतुरूपा ऋतुप्रिया ।।९२।।
रक्तप्रिया रक्तवती रङ्गिणी रक्तदन्तिका।
लक्ष्मीर्लज्जा लक्तिका च लीलालग्ना निताक्षिणी ।।९३।।
लीला लीलावती लोमा हर्षाह्लादनपट्टिका।
ब्रह्मस्थिता ब्रह्मरूपा ब्रह्मणा वेदवन्दिता ।।९४।।

ब्रह्मोद्भवा ब्रह्मकला ब्रह्माणी ब्रह्मबोधिनी ।
वेदाङ्गना वेदरूपा वनिता विनता वसा ॥९५॥
बाला च युवती वृद्धा ब्रह्मकर्मपरायणा ।
विन्ध्यस्था विन्ध्यवासी च बिन्दुयुक् बिन्दुभूषणा ॥९६॥
विद्यावती वेदधारी व्यापिका बर्हिणीकला ।
वामाचारप्रिया वह्निर्वामाचारपरायणा ॥९७॥
वामाचाररता देवी वामदेवप्रियोत्तमा ।
बुद्धेन्द्रिया विबुद्धा च बुद्धाचरणमालिनी ॥९८॥
बन्धमोचनकर्त्री च वारुणा वरुणालया ।
शिवा शिवप्रिया शुद्धा शुद्धाङ्गी शुक्लवर्णिका ॥९९॥
शुक्लपुष्पप्रिया शुक्ला शिवधर्मपरायणा ।
शुक्लस्था शुक्लिनी शुक्लरूपा शुक्लपशुप्रिया ॥१००॥
शुक्रस्था शुक्रिणी शुक्रा शुक्ररूपा च शुक्रिका ।
षण्मुखी च षडङ्गा च षट्चक्रविनिवासिनी ॥१०१॥
षड्ग्रन्थियुक्ता षोढा च षण्माता च षडात्मिका ।
षडङ्गयुवती देवी षडङ्गप्रकृतिर्वशी ॥१०२॥
षडानना षड्रसा च षष्ठी षष्ठेश्वरी प्रिया ।
षडङ्गस्वादा षोडशी च षोढान्यासस्वरूपिणी ॥१०३॥
षट्चक्रभेदनकरी षट्चक्रस्थस्वरूपिणी ।
षोडशस्वररूपा च षण्मुखी षड्रदान्विता ॥१०४॥
सनकादिस्वरूपा च शिवधर्मपरायणा ।
सिद्धा सप्तस्वरी शुद्धा सुरमाता स्वरोत्तमा ॥१०५॥
सिद्धविद्या सिद्धमाता सिद्धाऽसिद्धस्वरूपिणी ।
हरा हरिप्रिया हारा हारिणी हारयुक् तथा ॥१०६॥
हरिरूपा हरिधरा हरिणाक्षी हरिप्रिया ।
हेतुप्रिया हेतुरता हिताऽहितस्वरूपिणी ॥१०७॥
क्षमा क्षमावती क्षीता क्षुद्रघण्टाविभूषणा ।
भयङ्करी क्षितीशा च क्षीणमञ्चसुशोभना ॥१०८॥
अजानन्ता अपर्णा च अहल्या शेषशायिनी ।
स्वान्तर्गता च साधूनामन्तराऽनन्तरूपिणी ॥१०९॥
अरूपा अमला चार्द्धा अनन्तगुणशालिनी ।
स्वविद्या विद्यकाविद्या विद्या चार्विन्दलोचना ॥११०॥
अपराजिता जातवेदा अजपा अमरावती ।
अल्पा स्वल्पा अनल्पाद्या अणिमासिद्धिदायिनी ॥१११॥

अष्टसिद्धिप्रदा देवी रूपलक्षणसंयुता ।
अरविन्दमुखा देवी भोगसौख्यप्रदायिनी ॥११२॥
आदिविद्या आदिभूता आदिसिद्धिप्रदायिनी ।
सीत्काररूपिणी देवी सर्वासनविभूषिता ॥११३॥
इन्द्रप्रिया च इन्द्राणी इन्द्रप्रस्थनिवासिनी ।
इन्द्राक्षी इन्द्रवज्रा च इन्द्रमद्योक्षणी तथा ॥११४॥
ईलाकामनिवासा च ईश्वरीश्वरवल्लभा ।
जननी चेश्वरी दीना भेदा चेश्वरकर्मकृत् ॥११५॥
उमा कात्यायनी ऊद्र्ध्वा मीना चोत्तरवासिनी ।
उमापतिप्रिया देवी शिवा चोङ्काररूपिणी ॥११६॥
उरगेन्द्रशिरोरत्ना उरगोरगवल्लभा ।
उद्यानवासिनी माला प्रशस्तमणिभूषणा ॥११७॥
ऊर्ध्वदन्तोत्तमाङ्गी च उत्तमा चोर्ध्वकेशिनी ।
उमासिद्धिप्रदा या च उरगासनसंस्थिता ॥११८॥
ऋषिपुत्री ऋषिच्छन्दा ऋषिसिद्धिप्रदायिनी ।
उत्सवोत्सवसीमन्ता कामिका च गुणान्विता ॥११९॥
एला एकारविद्या च एणी विद्याधरा तथा ।
ॐकारवलयोपेता ओङ्कारपरमाकला ॥१२०॥
ॐवदवदवाणी च ॐकाराक्षरमण्डिता ।
ऐन्द्री कुलिशहस्ता च ॐलोकपरवासिनी ॥१२१॥
ॐकारमध्यबीजा च ॐनमोरूपधारिणी ।
परब्रह्मस्वरूपा च अंशुकाशुकवल्लभा ॥१२२॥
ॐकारा अः षण्मन्त्रा च अक्षाक्षरविभूषिता ।
अमन्त्रा मन्त्ररूपा च पदशोभासमन्विता ॥१२३॥
प्रणवोङ्काररूपा च प्रणवोच्चारभाक् पुनः ।
ह्रीङ्काररूपा ह्रीङ्कारी वाग्बीजाक्षरभूषणा ॥१२४॥
हृल्लेखा सिद्धियोगा च हृत्पद्मासनसंस्थिता ।
बीजाख्या नेत्रहृदया ह्रींबीजा भुवनेश्वरी ॥१२५॥
क्लीं कामराजा क्लिन्ना च चतुर्वर्गफलप्रदा ।
क्लीं क्लीं क्लीं रूपिकादेवी क्रीं क्रीं क्रीं नामधारिणी ॥१२६॥
कमलाशक्तिबीजा च पाशाङ्कुशविभूषिता ।
श्रीं श्रीङ्कारा महाविद्या श्रद्धा श्रद्धावती तथा ॥१२७॥
ॐ ऐं क्लीं ह्रीं श्रीं परा च क्लीङ्कारी परमाकला ।
ह्रीं क्लीं श्रीङ्कारस्वरूपा सर्वकर्मफलप्रदा ॥१२८॥

सर्वाढ्या सर्वदेवी च सर्वसिद्धिप्रदा तथा ।
सर्वज्ञा सर्वशक्तिश्च वाग्विभूतिप्रदायिनी ॥१२९॥
सर्वमोक्षप्रदा देवी सर्वभोगप्रदायिनी ।
गुणेन्द्रवल्लभा वामा सर्वशक्तिप्रदायिनी ॥१३०॥
सर्वानन्दमयी चैव सर्वसिद्धिप्रदायिनी ।
सर्वचक्रेश्वरी देवी सर्वसिद्धेश्वरी तथा ॥१३१॥
सर्वप्रियङ्करी चैव सर्वसौख्यप्रदायिनी ।
सर्वानन्दप्रदा देवी ब्रह्मानन्दप्रदायिनी ॥१३२॥
मनोवाञ्छितदात्री च मनोवृद्धिसमन्विता ।
अकारादि-क्षकारान्ता दुर्गा दुर्गार्तिनाशिनी ॥१३३॥
पद्मनेत्रा सुनेत्रा च स्वधा स्वाहा वषट्करी ।
स्ववर्गा देववर्गा च तवर्गा च समन्विता ॥१३४॥
अन्तस्था वेश्मरूपा च नवदुर्गा नरोत्तमा ।
तत्त्वसिद्धिप्रदा नीला तथा नीलपताकिनी ॥१३५॥
नित्यरूपा निशाकारी स्तम्भिनी मोहिनीति च ।
वशङ्करी तथोच्चाटी उन्मादी कार्षिणीति च ॥१३६॥
मातङ्गी मधुमत्ता च अणिमा लघिमा तथा ।
सिद्धा मोक्षप्रदा नित्या नित्यानन्दप्रदायिनी ॥१३७॥
रक्ताङ्गी रक्तनेत्रा च रक्तचन्दनभूषिता ।
स्वल्पसिद्धिः सुकल्पा च दिव्याचरणशुक्रभा ॥१३८॥
संक्रान्तिः सर्वविद्या च सस्यवासरभूषिता ।
प्रथमा च द्वितीया च तृतीया च चतुर्थिका ॥१३९॥
पञ्चमी चैव षष्ठी च विशुद्धा सप्तमी तथा ।
अष्टमी नवमी चैव दशम्येकादशी तथा ॥१४०॥
द्वादशी त्रयोदशी च चतुर्दश्यथ पूर्णिमा ।
अमावस्या तथा पूर्वा उत्तरा परिपूर्णिमा ॥१४१॥
खड्गिनी चक्रिणी घोरा गदिनी शूलिनी तथा ।
भुशुण्डी चापिनी बाणसर्वायुधविभूषणा ॥१४२॥
कुलेश्वरी कुलवती कुलाचारपरायणा ।
कुलकर्मसु रक्ता च कुलाचारप्रवर्द्धिनी ॥१४३॥
कीर्तिः श्रीश्चरमा रामा धर्मायै सततं नमः ।
क्षमा धृतिः स्मृतिर्मेधा कल्पवृक्षनिवासिनी ॥१४४॥
उग्रा उग्रप्रभा गौरी वेदविद्याविबोधिनी ।
साध्या सिद्धा सुसिद्धा च विप्ररूपा तथैव च ॥१४५॥

काली कराली काल्या च कालदैत्यविनाशिनी ।
कीलिनी कालिका चैव क-च-ट-त-पवर्गिका ॥१४६॥
जयिनी जययुक्ता च जयदा जृम्भिणी तथा ।
स्राविणी द्राविणी देवी भरुण्डा विन्ध्यवासिनी ॥१४७॥
ज्योतिर्भूता च जयदा ज्वालामालासमाकुला ।
भिन्नाभिन्नप्रकाशा च विभिन्ना भिन्नरूपिणी ॥१४८॥
अश्विनी भरणी चैव नक्षत्रसम्भवानिला ।
काश्यपी विनताख्याता दितिरदितिरेव च ॥१४९॥
कीर्तिः कामप्रिया देवी कीर्त्यकीर्तिविवर्द्धिनी ।
सद्योमांससमा लब्धा सद्यश्छिन्नापि शङ्करा ॥१५०॥
दक्षिणा चोत्तरा पूर्वा पश्चिमा दिक् तथैव च ।
अग्नि-नैर्ऋति-वायव्या ईशान्यादि तथा स्मृता ॥१५१॥
ऊर्ध्वाङ्गाधोगता श्वेता कृष्णा रक्ता च पीतका ।
चतुर्वर्गा चतुर्वर्णा चतुर्मात्रात्मिकाक्षरा ॥१५२॥
चतुर्मुखी चतुर्वेदा चतुर्विद्या चतुर्मुखा ।
चतुर्गणा चतुर्माता चतुर्वर्गफलप्रदा ॥१५३॥
धात्री विधात्री मिथुना नारीनायकवासिनी ।
सुरामुदा मुदवतों मोदिनी मेनकात्मजा ॥१५४॥
ऊर्ध्वकाली सिद्धिकाली दक्षिणा कालिका शिवा ।
नील्या सरस्वती सा त्वं बगला छिन्नमस्तका ॥१५५॥
सर्वेश्वरी सिद्धविद्या परा परमदेवता ।
हिङ्गुला हिङ्गुलाङ्गी च हिङ्गुलाधरवासिनी ॥१५६॥
हिङ्गुलोत्तमवर्णाभा हिङ्गुला भरणा च सा ।
जाग्रती च जगन्माता जगदीश्वरवल्लभा ॥१५७॥
जनार्दनप्रिया देवी जययुक्ता जयप्रदा ।
जगदानन्दकारी च जगदाह्लादकारिणी ॥१५८॥
ज्ञानदानकरी यज्ञा जानकी जनकप्रिया ।
जयन्ती जयदा नित्या ज्वलदग्निसमप्रभा ॥१५९॥
विद्याधरा च बिम्बोष्ठी कैलासाचलवासिनी ।
विभवा वडवाग्निश्च अग्निहोत्रफलप्रदा ॥१६०॥
मन्त्ररूपा परादेवी तथैव गुरुरूपिणी ।
गया गङ्गा गोमती च प्रभासा पुष्कराऽपि च ॥१६१॥
विन्ध्याचलरता देवी विन्ध्याचलनिवासिनी ।
बहू बहुसुन्दरी च कंसासुरविनाशिनी ॥१६२॥

शूलिनी शूलहस्ता च वज्रा वज्रहराऽपि च।
दुर्गा शिवा शान्तिकरी ब्रह्माणी ब्राह्मणप्रिया ॥१६३॥
सर्वलोकप्रणेत्री च सर्वरोगहराऽपि च।
मङ्गला शोभना शुद्धा निष्कला परमाकला ॥१६४॥
विश्वेश्वरी विश्वमाता ललितावसितानना।
सदाशिवा उमा क्षेमा चण्डिका चण्डविक्रमा ॥१६५॥
सर्वदेवमयी देवी सर्वागमभयापहा।
ब्रह्मेशविष्णुनमिता सर्वकल्याणकारिणी ॥१६६॥
योगिनी योगमाता च योगीन्द्रहृदयस्थिता।
योगिजाया योगवती योगीन्द्रानन्दयोगिनी ॥१६७॥
इन्द्रादिनमिता देवी ईश्वरी चेश्वरप्रिया।
विशुद्धिदा भयहरा भक्तद्वेषी भयङ्करी ॥१६८॥
भववेषा कामिनी च भरुण्डाभयकारिणी।
बलभद्रप्रियाकारा संसारार्णवतारिणी ॥१६९॥
पञ्चभूता सर्वभूता विभूतिर्भूतिधारिणी।
सिंहवाहा महामोहा मोहपाशविनाशिनी ॥१७०॥
मन्दुरा मदिरा मुद्रा मुद्रामुद्गरधारिणी।
सावित्री च महादेवी परप्रियनिनायका ॥१७१॥
यमदूती च पिङ्गाक्षी वैष्णवी शङ्करी तथा।
चन्द्रप्रिया चन्द्ररता चन्दनारण्यवासिनी ॥१७२॥
चन्दनेन्द्रसमायुक्ता चण्डदैत्यविनाशिनी।
सर्वेश्वरी यक्षिणी च किराती राक्षसी तथा ॥१७३॥
महाभोगवती देवी महामोक्षप्रदायिनी।
विश्वहन्त्री विश्वरूपा विश्वसंहारकारिणी ॥१७४॥
धात्री च सर्वलोकानां हितकारणकामिनी।
कमला सूक्ष्मदा देवी धात्री हरविनाशिनी ॥१७५॥
सुरेन्द्रपूजिता सिद्धा महातेजोवतीति च।
परारूपवती देवी त्रैलोक्याकर्षरूपिणी ॥१७६॥
इति ते कथितं देवि! पीतानामसहस्रकम्।
पठेद् वा पाठयेद् वाऽपि सर्वसिद्धिर्भवेत् प्रिये ॥१७७॥
इति ते विष्णुना प्रोक्तं महास्तम्भकरं परम्।
प्रात:काले च मध्याह्ने सन्ध्याकाले च पार्वति ॥१७८॥
एकचित्त: पठेदेतत् सर्वसिद्धिर्भविष्यति।
एकवारं पठेद् यस्तु सर्वपापक्षयो भवेत् ॥१७९॥

द्विवारं प्रपठेद्यस्तु विघ्नेश्वरसमो भवेत्।
त्रिवारं पठनाद् देवि! सर्वं सिध्यति सर्वथा ॥१८०॥
स्तवस्याऽस्य प्रभावेण साक्षाद् भवति सुव्रते।
मोक्षार्थी लभते मोक्षं धनार्थी लभते धनम् ॥१८१॥
विद्यार्थी लभते विद्यां तर्कव्याकरणान्विताम्।
महित्वं वत्सरान्ताच्च शत्रुहानिः प्रजायते ॥१८२॥
क्षोणीपतिर्वशस्तस्य स्मरणे सदृशो भवेत्।
यः पठेत् सर्वदा भक्त्या श्रेयस्तु भवति प्रिये ॥१८३॥
गणाध्यक्षप्रतिनिधिः कविकाव्यपरो वरः।
गोपनीयं प्रयत्नेन जननीजारवत्सदा ॥१८४॥
हेतुयुक्तो भवेन्नित्यं शक्तियुक्तः सदा भवेत्।
य इदं पठते नित्यं शिवेन सदृशो भवेत् ॥१८५॥
जीवन् धर्मार्थभोगी स्यान्मृतो मोक्षपतिर्भवेत्।
सत्यं सत्यं महादेवि! सत्यं सत्यं न संशयः ॥१८६॥
स्तवस्यास्य प्रभावेण देवेन सह मोदते।
सुचित्ताश्च सुराः सर्वे स्तवराजस्य कीर्तनात् ॥१८७॥
पीताम्बरपरीधाना पीतगन्धानुलेपना।
परमोदयकीर्त्तिः स्यात् परतः सुरसुन्दरि ॥१८८॥

◆

बगलापञ्जरस्तोत्रम्

सूत उवाच

सहस्रादित्यसङ्काशं शिवं साम्बं सनातनम्।
प्रणम्य नारदः प्राह विनम्रो नतकन्धरः ॥१॥

श्रीनारद उवाच

भगवन्! साम्बा तत्त्वज्ञ सर्वदुःखापहारक।
श्रीमत्पीताम्बरादेव्याः पञ्जरं पुण्यदं सताम् ॥२॥
प्रकाशय विभो नाथ कृपां कृत्वा ममोपरि।
यद्यहं तव पादाब्जधूलिधूसरितोऽभवम् ॥३॥

श्रीशिव उवाच

ॐ अस्य श्रीमद्बगलामुखीपीताम्बरापञ्जररूपस्तोत्रमन्त्रस्य भगवते नारदऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, जगद्वश्यकरी श्रीपीताम्बराबगलामुखीदेवतायै नमो हृदये, ह्लीं बीजाय नमो दक्षिणस्तने, स्वाहाशक्तये नमो वामस्तने, क्लीं कीलकाय नमो नाभौ, मम परसैन्यमन्त्रतन्त्रयन्त्रादिकृतविपक्षक्षयार्थं श्रीमत्पीताम्बराबगलादेव्याः प्रीतये

जपे विनियोगः। करसम्पुटेन मूलेन करशुद्धिः। ह्लामिति षड्दीर्घेण षडङ्गः। **मूलेन** व्यापकम्।

ध्यानम्—

मध्ये सुधाब्धिमणिमण्डितरत्नवेद्यां, सिंहासनोपरि गतां परिपीतवर्णाम्।
पीताम्बराभरणमाल्यविभूषिताङ्गीं देवीं नमामि धृतमुद्गरवैरिजिह्वाम्॥

इति ध्यात्वा, मनसा सम्पूज्य, मुद्रां प्रदर्श्य, ऋष्यादिन्यासं कृत्वा पञ्जरं न्यसेत्।

श्रीशिव उवाच

पञ्जरं तत् प्रवक्ष्यामि देव्याः पापप्रणाशनम्।
यं प्रविश्य न बाधन्ते बाणैरपि नराः क्वचित्॥१॥
ॐ ऐं ह्लीं श्रीं श्रीमत्पीताम्बरादेवी बगला बुद्धिवर्धिनी।
पातु मामनिशं साक्षात् सहस्रार्कसमद्युतिः॥२॥
शिखादिपादपर्यन्तं वज्रपञ्जरधारिणी।
ॐ ऐं ह्लीं श्रीमद्ब्रह्मास्त्रविद्याया पीताम्बराविभूषिता॥३॥
बगला मामवत्यत्र मूर्धभागं महेश्वरी।
ॐ ऐं ह्लीं श्रीं कामाङ्कुशकला पातु बगलाशास्त्रबोधिनी॥४॥
पीताम्बरा सहस्राक्षा ललाटं कामितार्थदा।
ॐ ऐं ह्लीं श्रीं पातु बगला पीताम्बरसुधारिणी॥५॥
कर्णयोश्चैव युगपद् अतिरत्नप्रपूजिता।
ॐ ऐं ह्लीं श्रीं पातु बगला नासिकां मे गुणाकरा॥६॥
पीतपुष्पैः पीतवस्त्रैः पूजिता वेददायिनी।
ॐ ऐं ह्लीं श्रीं पातु बगला ब्रह्मविष्ण्वादिसेविता॥७॥
पीताम्बरा प्रसन्नास्या नेत्रयोर्युगपद् भ्रुवौ।
ॐ ऐं ह्लीं श्रीं पातु बगला बलिदा पीतवस्त्रधृक्॥८॥
अधरोष्ठौ तथा दन्तान् जिह्वां च मुखगां मम।
ॐ ऐं ह्लीं श्रीं पातु बगला पीताम्बरसुधारिणी॥९॥
गले हस्ते तथा बाह्वोः युगपद् बुद्धिदा सताम्।
ॐ ऐं ह्लीं श्रीं पातु बगला दिव्यस्रगनुलेपना॥१०॥
हृदये च स्तनौ नाभौ करावपि कृशोदरी।
ॐ ऐं ह्लीं श्रीं पातु बगला पीतवस्त्रघनावृता॥११॥
जङ्घायां च तथा चोर्वोर्गुल्फयोश्चातिवेगिनी।
अनुक्तमपि यत् स्थानं त्वक्केशनखलोमकम्॥१२॥
असृङ् मांसं तथाऽस्थीनि सन्धयश्चापि मे परा।

श्रीशिव उवाच

इत्येतद् वरदं गोप्यं कलावपि विशेषत: ॥१३॥
पञ्जरं बगलादेव्या दीर्घदारिद्र्यनाशनम् ।
पञ्जरं य: पठेत् भक्त्या स विघ्नैर्नाभिभूयते ॥१४॥
अव्याहतगतिश्चास्य ब्रह्मविष्ण्वादिसत्पुरे ।
स्वर्गे मर्त्ये च पाताले नाऽरयस्तं कदाचन ॥१५॥
प्रबाधन्ते नरव्याघ्रं पञ्जरस्थं कदाचन ।
अतो भक्तै: कौलिकैश्च स्वरक्षार्थं सदैव हि ॥१६॥
पठनीयं प्रयत्नेन सर्वाऽनर्थविनाशनम् ।
महादारिद्र्यशमनं सर्वमाङ्गल्यवर्धनम् ॥१७॥
विद्याविनयसत्सौख्यं महासिद्धिकरं परम् ।
इदं ब्रह्मास्त्रविद्याया: पञ्जरं साधु गोपितम् ॥१८॥
पठेत् स्मरेद् ध्यानसंस्थ: स जीयान् मरणान् नर: ।
य: पञ्जरं प्रविश्यैव मन्त्रं जपति वै भुवि ॥१९॥
कौलिकोऽकौलिको वाऽपि व्यासवद् विचरेद् भुवि ।
चन्द्रसूर्यप्रभुर्भूत्वा वसेत् कल्पायुतं दिवि ॥२०॥

श्रीसूत उवाच

इति कथितमशेषं श्रेयसामादिबीजं
भवशतदुरितघ्नं ध्वस्तमोहान्धकारम् ।
स्मरणमतिशयेन प्राप्तिरेवात्र मर्त्यो:
यदि विशति सदा वै पञ्जरं पण्डित: स्यात् ॥२१॥

पीताम्बरापञ्जरं समाप्तम्

अथ पञ्जरन्यासस्तोत्रम्

बगला पूर्वतो रक्षेद् आग्नेय्यां च गदाधरी ।
पीताम्बरा दक्षिणे च स्तम्भिनी चैव नैर्ऋते ॥१॥
जिह्वाकीलिन्यतो रक्षेत् पश्चिमे सर्वदा हि माम् ।
वायव्ये च मदोन्मत्ता कौबेर्यां च त्रिशूलिनी ॥२॥
ब्रह्मास्त्रदेवता पातु ऐशान्यां सततं मम ।
संरक्षेन् मां तु सततं पाताले स्तब्धमातृका ॥३॥
ऊर्ध्वं रक्षेन्महादेवी जिह्वास्तम्भनकारिणी ।
एवं दश दिशो रक्षेद् बगला सर्वसिद्धिदा ॥४॥
एवं न्यासविधिं कृत्वा यत् किञ्चिज्जपमाचरेत् ।
तस्या: संस्मरणादेव शत्रूणां स्तम्भनं भवेत् ॥५॥

●

सहस्त्रनामस्तोत्रम्

'श्रीउत्कटशम्बरनागेन्द्रप्रयाणतन्त्र' में भी देवी का सहस्त्रनामस्तोत्र प्राप्त होता है जो निम्नांकित है—

विनियोग—ॐ अस्य श्रीपीताम्बरीसहस्त्रनामस्तोत्रस्य भगवान् सदाशिव ऋषिः, अनुष्टुप् छन्दः, श्री जगद्वश्यकरी पीताम्बरी देवता सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

ध्यानम्—

पीताम्बरपराधीनां पीनोन्नतपयोधराम् ।
जटामुकुटशोभाढ्यां पीतभूमिसुखासनाम् ।
शत्रोर्जिह्वां मुद्गरश्च बिभ्रतीम्परमां कलाम् ॥
ॐ ब्रह्मास्त्रब्रह्मब्रह्मा च ब्रह्ममाता सनातनी ।
ब्रह्मेशी ब्रह्मकैवल्यमङ्गला ब्रह्मचारिणी ॥
नित्यानन्दा नित्यसिद्धा नित्यरूपा निरामया ।
सन्धारिणी महामाया कटाक्षक्षेमकारिणी ॥
कमला विमला नीला रत्नकान्तिगुणाश्रिता ।
कामप्रिया कामरता कामकामस्वरूपिणी ॥
मङ्गला विजया जाया सर्वमङ्गलकारिणी ।
कामिनी कामिनीकाम्या कामुका कामचारिणी ॥
कामप्रिया कामरता कामाकामस्वरूपिणी ।
कामाख्या कामबीजस्था कामपीठनिवासिनी ॥
कामदा कामहा काली कपाली च करालिका ।
कंसारिः कमला कामा कैलासेश्वरवल्लभा ॥
कात्यायनी केशवा च करुणा कामकेलिभुक् ।
क्रिया कीर्तिः कृत्तिका च काशिका मथुरा शिवा ॥
कालाक्षी कालिका काली धवलाननसुन्दरी ।
खेचरी च खमूर्तिश्च क्षुद्रा क्षुद्रक्षुधावरा ॥
खड्गहस्ता खड्गरता खड्गिनी खर्परप्रिया ।
गङ्गा गौरी गामिनी च गीता गोत्रविवर्धिनी ॥
गोधरा गोकरा गोधा गन्धर्वपुरवासिनी ।
गन्धर्वा गन्धर्वकला गोपनी गरुडासना ॥
गोविन्दभावा गोविन्दा गान्धारी गन्धमादिनी ।
गौराङ्गी गोपिका मूर्तिर्गोपी गोष्ठनिवासिनी ॥
गन्धा गजेन्द्रगामान्या गदाधरप्रिया ग्रहा ।
घोरघोरा घोररूपा घनश्रोणी घनप्रभा ॥

दैत्येन्द्रप्रबला घण्टावादिनी घोरनिस्वना ।
डकिन्युमा उपेन्द्रा च उर्वशी उरगासना ।।
उत्तमा उन्नता उन्ना उत्तमस्थानवासिनी ।
चामुण्डा मुण्डिता चण्डी चण्डदर्पहरेति च ।।
उग्रचण्डा चण्डचण्डा चण्डदैत्यविनाशिनी ।
चण्डरूपा प्रचण्डा च चण्डाचण्डशरीरिणी ।।
चतुर्भुजा प्रचण्डा च चराचरनिवासिनी ।
क्षत्रप्रायशिरोवाहा छला छलतरा छली ।।
क्षत्ररूपा क्षत्रधरा क्षत्रियक्षयकारिणी ।
जया च जयदुर्गा च जयन्ती जयदा परा ।।
जायिनी जयिनी ज्योत्स्ना जटाधरप्रिया जिता ।
जितेन्द्रिया जितक्रोधा जयमाना जनेश्वरी ।
जितमृत्युर्जरातीता जाह्नवी जनकात्मजा ।
झङ्कारा झञ्झरी झण्टा झकारी झकशोभनी ।।
झखा झमेशा झङ्कारी योनिकल्याणदायिनी ।
झञ्झरा झमुरी झारा झराझरतरा परा ।।
झञ्झा झमेता झङ्कारी झणाकल्याणदायिनी ।
ईमना मानसी चिन्त्या ईमुना शङ्करप्रिया ।।
टङ्कारी टिटिका टीका टङ्किनी च टवर्गका ।
टापा टोपा टटपतिष्टमनी टमनप्रिया ।।
ठकारधारिणी ठीका ठकरी ठिकरप्रिया ।
ठेठठासा ठकरती ठामिनी ठमनप्रिया ।।
डारहा डाकिनी डारा डामरा डमरप्रिया ।
डखिनी डडयुक्ता च डमरूकरवल्लभा ।।
ढक्का ढक्की ढक्कनादा ढोलशब्दप्रबोधिनी ।
ढामिनी ढामनप्रीता ढगतन्त्रप्रकाशिनी ।।
अनेकरूपिणी अम्बा अणिमासिद्धिदायिनी ।
अमन्त्रिणी अणुकरी अणुमद्भानुसंस्थिता ।।
तारा तन्त्रावती तन्त्रतत्त्वरूपा तपस्विनी ।
तरङ्गिणी तत्त्वपरा तन्त्रिका तन्त्रविग्रहा ।।
तपोरूपा तत्त्वदात्री तपःप्रीतिप्रधर्षिणी ।
तन्त्रा यन्त्रार्चनपरा तलातलनिवासिनी ।।
तल्पदा त्वल्पदा काम्या स्थिरा स्थिरतरा स्थितिः ।
स्थाणुप्रिया स्थपरा स्थिता स्थानप्रदायिनी ।।

दिगम्बरा दयारूपा दावाग्निदमनी दमा ।
दुर्गा दुर्गापरा देवी दुष्टदैत्यविनाशिनी ।।
दमनप्रमदा दैत्यदयादानपरायणा ।
दुर्गार्तिनाशिनी दान्ता दम्भिनी दम्भवर्जिता ।।
दिगम्बरप्रिया दम्भा दैत्यदम्भविदारिणी ।
दमना दशनसौन्दर्या दानवेन्द्रविनाशिनी ।।
दयाधरा च दमनी दर्भपत्रविलासिनी ।
धरिणी धारिणी धात्री धराधरधरप्रिया ।।
धराधरसुता देवी सुधर्मा धर्मचारिणी ।
धर्मज्ञा धवला धूला धनदा धनवर्धिनी ।।
धीराधीरा धीरतरा धीरसिद्धिप्रदायिनी ।
धन्वन्तरिधराधीरा ध्येया ध्यानस्वरूपिणी ।।
नारायणी नारसिंही नित्यानन्दनरोत्तमा ।
नक्ता नक्तवती नित्या नीलजीमूतसन्निभा ।
यमरूपा च यमुना जयन्ती च जयप्रदा ।
याम्या यमवती युद्धा यदोः कुलविवर्धिनी ।।
रमा रामा रामपत्नी रत्नमाला रतिप्रिया ।
रत्नसिंहासनस्था च रत्नाभरणमण्डिता ।।
रमणी रमणीया च रत्या रसपरायणा ।
रतानन्दा रतवती रघूणाङ्कुलवर्धिनी ।।
रमणारिपरिभ्राज्या रैधाराधिकरत्नजा ।
रावी रसस्वरूपा च रात्रिराजसुखावहा ।।
ऋतुजा ऋतुदा ऋद्धा ऋतुरूपा ऋतुप्रिया ।
रक्तप्रिया रक्तवती रङ्गिणी रक्तदन्तिका ।
लक्ष्मीर्लज्जा लतिका च लीला लग्ना निताक्षिणी ।
लीला लीलावती लोमाहर्षाह्लादनपट्टिका ।।
ब्रह्मस्थिता ब्रह्मरूपा ब्रह्मणा वेदवन्दिता ।।
ब्रह्मोद्भवा ब्रह्मकला ब्रह्माणी ब्रह्मबोधिनी ।।
वेदाङ्गना वेदरूपा वनिता विनता वसा ।
बाला च युवती वृद्धा ब्रह्मकर्मपरायणा ।।
विन्ध्यस्था विन्ध्यवासी च बिन्दुयुग्बिन्दुभूषणा ।
विद्यावती वेदधारी व्यापिका बर्हिणी कला ।।
वामाचारप्रिया वह्निर्वामाचारपरायणा ।
वामाचाररता देवी वामदेवप्रियोत्तमा ।।

बुद्धेन्द्रिया विबुद्धा च बुद्धाचरणमालिनी ।
बन्धमोचनकर्त्री च वारुणा वरुणालया ।।
शिवा शिवप्रिया शुद्धा शुद्धाङ्गी शुक्लवर्णिका ।
शुक्लपुष्पप्रिया शुक्ला शिवधर्मपरायणा ।।
शुक्लस्था शुक्लिनी शुक्लरूपशुक्लपशुप्रिया ।
शुक्रस्था शुक्रिणी शुक्रा शुक्ररूपा च शुक्रिका ।।
षण्मुखी च षडङ्गा च षट्चक्रविनिवासिनी ।
षड्ग्रन्थियुक्ता षोढा च षण्माता च षडात्मिका ।
षडङ्गयुवती देवी षडङ्गप्रकृतिर्वशी ।
षडानना षड्रसा च षष्ठी षष्ठेश्वरीप्रिया ।।
षङ्गवादा षोडशी च षोढान्यासस्वरूपिणी ।
षट्चक्रभेदनकरी षट्चक्रस्थस्वरूपिणी ।।
षोडशस्वरूपा च षण्मुखी षड्रदान्विता ।
सनकादिस्वरूपा च शिवधर्मपरायणा ।।
सिद्धा सप्तस्वरी शुद्धा सुरमाता स्वरोत्तमा ।
सिद्धविद्या सिद्धमाता सिद्धा सिद्धस्वरूपिणी ।।
हरा हरिप्रिया हारा हारिणी हारयुक् तथा ।
हरिरूपा हरिधारा हरिणाक्षी हरिप्रिया ।।
हेतुप्रिया हेतुरता हिताहितस्वरूपिणी ।
क्षमा क्षमावती क्षीता क्षुद्रघण्टाविभूषणा ।।
क्षयङ्करी क्षितीशा च क्षीणा मध्यसुशोभना ।
अजानन्ता अपर्णा च अहल्याशेषशायिनी ।।
स्वान्तर्गता च साधूनामन्तरानन्तरूपिणी ।
अरूपा अमला चार्द्धा अनन्तगुणशालिनी ।।
स्वविद्या विद्यकाविद्या विद्या चार्विन्दलोचना ।
अपराजिता जातवेदा अजपा अमरावती ।।
अल्पा स्वल्पा अनल्पाद्या अणिमासिद्धिदायिनी ।
अष्टसिद्धिप्रदा देवी रूपलक्षणसंयुता ।
अरविन्दमुखा देवी भोगसौख्यप्रदायिनी ।
आदिविद्या आदिभूता आदिसिद्धिप्रदायिनी ।।
सीत्काररूपिणी देवी सर्वासनविभूषिता ।
इन्द्रप्रिया च इन्द्राणी इन्द्रप्रस्थनिवासिनी ।।
इन्द्राक्षी इन्द्रवज्रा च इन्द्रमद्योक्षणी तथा ।
ईला कामनिवासा च ईश्वरीश्वरवल्लभा ।।

जननी चेश्वरी दीना भेदा चेश्वरकर्मकृत् ।
उमा कात्यायनी ऊर्ध्वा मीना चोत्तरवासिनी ।।
उमापतिप्रिया देवी शिवा चोङ्काररूपिणी ।
उरगेन्द्रशिरोरत्ना उरगोरगवल्लभा ।।
उद्यानवासिनी माला प्रशस्तमणिभूषणा ।
ऊर्ध्वदन्तोत्तमाङ्गी च उत्तमा चोर्द्ध्वकेशिनी ।।
उमासिद्धिप्रदा या च उरगासनसंस्थिता ।
ऋषिपुत्री ऋषिच्छन्दा ऋषिसिद्धिप्रदायिनी ।।
उत्सवोत्सवसीमन्ता कामिका च गुणान्विता ।
एला एकारविद्या च एणी विद्याधरा तथा ।।
ओङ्कारवलयोपेता ओङ्कारपरमा कला ।
ॐवदवदवाणी च ओङ्काराक्षरमण्डिता ।।
ऐन्द्री कुलिशहस्ता च ॐलोकपरवासिनी ।
ओङ्कारमध्यबीजा च ॐनमोरूपधारिणी ।।
परब्रह्मस्वरूपा च अंशुकांशुकवल्लभा ।
ओङ्कारा अः फट्मन्त्रा च अक्षाक्षरविभूषिता ।।
अमन्त्रा मन्त्ररूपा च पटभोभासमन्विता ।
प्रणवोङ्काररूपा च प्रणवोच्चारभाक् पुनः ।।
ह्रीङ्काररूपा ह्रीङ्कारी वाग्बीजाक्षरभूषणा ।
हृल्लेखा सिद्धियोगा च हृत्पद्मासनसंस्थिता ।।
बीजाख्या नेत्रहृदया ह्रींबीजा भुवनेश्वरी ।
क्लींकामराजा क्लित्रा च चतुर्वर्गफलप्रदा ।।
क्लींक्लींक्लींरूपिका देवी क्रींक्रींक्रींनामधारिणी ।।
कमला शक्तिबीजा च पाशाङ्कुशविभूषिता ।।
श्रीं श्रीङ्कारा महाविद्या श्रद्धा श्रद्धावती तथा ।
ॐ ऐं क्लीं ह्रीं श्रीं परा च क्लीङ्कारी परमा कला ।।
ह्रीं क्लीं श्रीकारस्वरूपा सर्वकर्मफलप्रदा ।
सर्वाढ्या सर्वदेवी च सर्वसिद्धिप्रदा तथा ।।
सर्वज्ञा सर्वशक्तिश्च वाग्विभूतिप्रदायिनी ।
सर्वमोक्षप्रदा देवी सर्वभोगप्रदायिनी ।।
गुणेन्द्रवल्लभा वामा सर्वशक्तिप्रदायिनी ।
सर्वानन्दमयी चैव सर्वसिद्धिप्रदायिनी ।।
सर्वचक्रेश्वरी देवी सर्वसिद्धेश्वरी तथा ।
सर्वप्रियङ्करी चैव सर्वसौख्यप्रदायिनी ।।

सर्वानन्दप्रदा देवी ब्रह्मानन्दप्रदायिनी ।
मनोवाञ्छितदात्री च मनोवृद्धिसमन्विता ॥
अकारादिक्षकारान्ता दुर्गा दुर्गार्तिनाशिनी ।
पद्मनेत्रा सुनेत्रा च स्वधास्वाहावषट्करी ॥
स्ववर्गा देववर्गा च तवर्गा च समन्विता ।
अन्तस्था वेश्मरूपा च नवदुर्गा नरोत्तमा ॥
तत्त्वसिद्धिप्रदा नीला तथा नीलपताकिनी ।
नित्यरूपा निशाकारी स्तम्भिनी मोहिनीति च ॥
वशङ्करी तथोच्चाटी उन्मादी कर्षिणीति च ।
मातङ्गी मधुमत्ता च अणिमा लघिमा तथा ॥
सिद्धा मोक्षप्रदा नित्या नित्यानन्दप्रदायिनी ।
रक्ताङ्गी रक्तनेत्रा च रक्तचन्दनभूषिता ॥
स्वल्पसिद्धिस्सुकल्पा च दिव्यचारणशुक्रभा ।
संक्रान्तिस्सर्वविद्या च सस्यवासरभूषिता ॥
प्रथमा च द्वितीया च तृतीया च चतुर्थिका ।
पञ्चमी चैव षष्ठी च विशुद्धा सप्तमी तथा ॥
अष्टमी नवमी चैव दशम्येकादशी तथा ।
द्वादशी त्रयोदशी च चतुर्दशपथपूर्णिमा ॥
अमावस्या तथा पूर्वा उत्तरा परिपूर्णिमा ।
खड्‌गिनी चक्रिणी घोरा गदिनी शूलिनी तथा ॥
भुशुण्डी चापिनी बाणा सर्वायुधविभूषणा ।
कुलेश्वरी कुलवती कुलाचारपरायणा ॥
कुलकर्मसुरक्ता च कुलाचारप्रवर्धिनी ।
कीर्तिः श्रीश्च रमा रामा धर्मायै सततं नमः ॥
क्षमा धृतिः स्मृतिर्मेधा कल्पवृक्षनिवासिनी ।
उग्रा उग्रप्रभा गौरी वेदविद्याविबोधिनी ॥
साध्या सिद्धा सुसिद्धा च विप्ररूपा तथैव च ।
काली कराली काल्या च कलादैत्यविनाशिनी ॥
कौलिनी कालिका चैव क-च-ट-त-पवर्णिका ।
जयिनी जययुक्ता च जयदा जृम्भिनी तथा ॥
स्राविणी द्राविणी देवी भरुण्डा विन्ध्यवासिनी ।
ज्योतिर्भूता च जयदा ज्वालामालासमाकुला ।
भिन्ना भिन्नप्रकाशा च विभिन्ना भिन्नरूपिणी ।
अश्विनी भरणी चैव नक्षत्रसम्भवानिला ॥

काश्यपी विनता ख्याता दितिजादितिरेव च।
कीर्तिः कामप्रिया देवी कीर्त्यां कीर्तिविवर्धिनी॥
सद्योमांससमालब्धा सद्यश्छिन्नासि शङ्करा।
दक्षिणा चोत्तरा पूर्वा पश्चिमा दिक् तथैव च॥
अग्निनैर्ऋतिवायव्या ईशान्यादिक् तथा स्मृता।
ऊर्ध्वाङ्गाधोगता श्वेता कृष्णा रक्ता च पीतका॥
चतुर्वर्गा चतुर्वर्णा चतुर्मात्रात्मिकाक्षरा।
चतुर्मुखी चतुर्वेदा चतुर्विद्या चतुर्मुखा॥
चतुर्गणा चतुर्माता चतुर्वर्गफलप्रदा।
धात्री विधात्री मिथुना नारी नायकवासिनी॥
सुरामुदा मुदवती मोदिनी मेनकात्मजा।
ऊर्ध्वकाली सिद्धिकाली दक्षिणाकालिका शिवा॥
नील्या सरस्वती सा त्वं बगला छिन्नमस्तका।
सर्वेश्वरी सिद्धविद्या परा परमदेवता॥
हिङ्गुला हिङ्गुलाङ्गी च हिङ्गुलाधरवासिनी।
हिङ्गुलोत्तमवर्णाभा हिङ्गुलाभरणा च सा॥
जाग्रती च जगन्माता जगदीश्वरवल्लभा।
जनार्दनप्रिया देवी जययुक्ता जयप्रदा॥
जगदानन्दकारी च जगदाह्लादकारिणी।
ज्ञानदानकरी यज्ञा जानकी जनकप्रिया॥
जयन्ती जयदा नित्या ज्वलदग्निसमप्रभा।
विद्याधरा च बिम्बोष्ठी कैलासाचलवासिनी॥
विभवा वडवाग्निश्च अग्निहोत्रफलप्रदा।
मन्त्ररूपा परा देवी तथैव गुरुरूपिणी॥
गया गङ्गा गोमती च प्रभासा पुष्करापि च।
विन्ध्याचलरता देवी विन्ध्याचलनिवासिनी॥
बहू बहुसुन्दरी च कंसासुरविनाशिनी।
शूलिनी शूलहस्ता च वज्रा वज्रहरापि च॥
दुर्गा शिवा शान्तिकरी ब्रह्माणी ब्राह्मणप्रिया।
सर्वलोकप्रणेत्री च सर्वरोगहरापि च॥
मङ्गला शोभना शुद्धा निष्कला परमा कला।
विश्वेश्वरी विश्वमाता ललिता वसितानना॥
सदाशिवा उमा क्षेमा चण्डिका चण्डविक्रमा।
सर्वदेवमयी देवी सर्वागमभयापहा॥

ब्रह्मेशविष्णुनमिता सर्वकल्याणकारिणी ।
योगिनी योगमाता च योगीन्द्रहृदयस्थिता ।।
योगिजाया योगवती योगीन्द्रानन्दयोगिनी ।
इन्द्रादिनमिता देवी ईश्वरी चेश्वरप्रिया ।।
विशुद्धिदा भयहरा भक्तद्वेषि भयङ्करी ।
भववेषा कामिनी च भरुण्डा भयकारिणी ।।
बलभद्रप्रियाकारा संसारार्णवतारिणी ।
पञ्चभूता सर्वभूता विभूतिर्भूतिधारिणी ।।
सिंहवाहा महामोहा मोहपाशविनाशिनी ।
मन्दुरा मदिरा मुद्रा मुद्रामुद्गरधारिणी ।।
सावित्री च महादेवी परप्रियनिनायिका ।
यमदूती च पिङ्गाक्षी वैष्णवी शङ्करी तथा ।।
चन्द्रप्रिया चन्द्ररता चन्दनारण्यवासिनी ।
चन्दनेन्द्रसमायुक्ता चण्डदैत्यविनाशिनी ।।
सर्वेश्वरी यक्षिणी च किराती राक्षसी तथा ।
महाभोगवती देवी महामोक्षप्रदायिनी ।।
विश्वहन्त्री विश्वरूपा विश्वसंहारकारिणी ।
कमला सूक्ष्मदा देवी धात्री हरविनाशिनी ।।
सुरेन्द्रपूजिता सिद्धा महातेजोवतीति च ।
परारूपवती देवी त्रैलोक्याकर्षकारिणी ।।

(उत्कटशम्बरनागेन्द्रप्रयाणतन्त्र)

◆

गायत्री मन्त्र—

'ॐ ह्रीं हंस: सोऽहं स्वाहा । हंसहंसाय विद्महे सोऽहं हंसाय धीमहि । तन्नो हंस: प्रचोदयात्' ।।

अद्वैत भावना का मनन-निदिध्यासन—

'अहं देवी न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानन्दरूपोऽहमात्मानमिति भावयेत्' ।।

सांख्यायनतन्त्र में भगवती बगला की उपासना में लक्ष्मीसूक्त के पाठ को भी सम्मिलित किया गया है ।

लक्ष्मीसूक्त—ॐ सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ।।१।।
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसु: ।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्विनौ ।।२।।

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥३॥
न क्रोधो न च मात्सर्यं न लोभो नाऽशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥४॥
पद्मानने पद्मऊरू पद्माक्षी पद्मसम्भवे ।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥५॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।
विष्णुप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥६॥
महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥७॥
पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥८॥
आनन्दः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः ।
ऋषयः श्रियपुत्राश्च मयि श्रीर्देवि देवता ॥९॥
ऋणरोगादिदारिद्र्यं पापं च अपमृत्यवः ।
भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥१०॥
श्रीर्वर्चस्वमायुष्यमारोग्यं मा विधाच्छोभमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥११॥

कलशस्थापन का तान्त्रिक विधान

मन्त्राभिषेक के प्रसङ्ग में (तृतीय पटल-सांख्यायनतन्त्र में) भगवती बगलामुखी की उपासना में कलशपूजन का विधान किया गया है और कहा गया है—

'प्रार्थयेद्युग्मसंयुक्तमर्चयेद्वस्त्रभूषणैः ॥१९॥
शक्रादिदिक्षु मन्त्रैश्च प्रथमं कलशार्चनम् ।
लक्ष्मीश्रीसूक्तकाभ्याञ्च द्वितीयं कलशार्चनम् ॥२०॥
पौरुषेणैव सूक्तेन तृतीयं कलशं तथा ।
नारायणानुवाकेन चतुर्थं कलशं तथा ॥२१॥
पञ्चब्रह्ममयैर्मन्त्रैः पञ्चमं कलशं तथा ।
षष्ठं चाम्भस्य पारेण ब्रह्मवल्ल्या तु सप्तमम् ॥२२॥
अष्टमं भृगुवल्ल्या तु मार्जयेन्मन्त्रकोविदः ।
मध्यस्थं पूर्वकलशं मूलमन्त्रेण मार्जयेत् ॥२३॥
एवं च मार्जनं कृत्वा नवीनैर्वस्त्रभूषणैः ।
अलंकृत्वा तु शिष्यं तमानीय मण्डपान्तरे' ॥२४॥

इस कलशस्थापन विधान को पूर्णत: प्रस्तुत करने पर इसका स्वरूप इस प्रकार होगा—

कलशपूजन के मन्त्र—अभिषेक-कलश को स्थापित करने के समय निम्न मन्त्रों का इस प्रकार प्रयोग किया जायेगा—

दिक्पालमन्त्र-प्रयोग : प्रथम कलश—

इन्द्रो वह्नि: पितृपतिर्नैर्ऋतो वरुणो मरुत् ।
कुबेर ईशो ब्रह्मा च ह्यनन्तो दश दिक्पति: ।।

(१) इन्द्रदेवता का आवाहन—

इन्द्रं सुरपतिश्रेष्ठं वज्रहस्तं महाबलम् ।
आवाहये यज्ञसिद्ध्यै शतयज्ञाधिपं प्रभुम् ।।

ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहव शूरमिन्द्रं धात्विन्द्र: । ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति मघवा धात्विन्द्र: ।।

ॐ भू: इन्द्रेहागच्छ । इन्द्राय नम: । इन्द्रं स्थापयामि पूजयामि ।।

(२) अग्निदेवता का आवाहन—

त्रिपादं सप्तहस्तं च द्विमूर्धानं द्विनासिकम् ।
षण्नेत्रं च चतु:श्रोत्रमग्निमावाहयाम्यहम् ।।

ॐ त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च बन्ध त्राता लोकस्य तनये गवामस्य निमेषꣳ रक्षमाणस्तव व्रते ।

ॐ भू: अग्ने इहागच्छ । अग्नये नम: । अग्निं स्थापयामि पूजयामि ।

(३) यमदेवता का आवाहन—

महामहिषमारूढं दण्डहस्तं महाबलम् ।
यज्ञसंरक्षणार्थाय यममावाहयाम्यहम् ।।
ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ।
धर्माय स्वाहा धर्म: पित्रे ।।

ॐ भू: यमेहागच्छ । यमाय नम: । यमं स्थापयामि पूजयामि ।

(४) निर्ऋतिदेवता का आवाहन—

सर्वप्रेताधिपं देवं निर्ऋतिं नीलविग्रहम् ।
आवाहये यज्ञसिद्ध्यै नरारूढं वरप्रदम् ।।

ॐ असुन्वन्तमयजमानमिच्छं स्तेनस्येत्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ।।

ॐ भूः निर्ऋते इहागच्छ। निर्ऋतये नमः। निर्ऋतिं स्थापयामि पूजयामि।

(५) वरुणदेवता का आवाहन—

शुद्धस्फटिकसङ्काशं जलेशं यादसां पतिम्।
आवाहये प्रतीचीशं वरुणं सर्वकामदम्॥

ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशᳪ समा न आयुः प्रमोषीः।

ॐ भूः वरुण इहागच्छ। वरुणाय नमः। वरुणं स्थापयामि पूजयामि।

(६) वायुदेवता का आवाहन—

मनोजवं महातेजं सर्वतश्चारिणं शुभम्।
यज्ञसंरक्षणार्थाय वायुमावाहयाम्यहम्॥

ॐ आनो नियुद् शतिनीभिरध्वरᳪ सहस्त्रिणीभिरुपयाहि यज्ञम्। वायो अस्मिन् सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः॥

ॐ भूः वायो इहागच्छ। वायवे नमः। वायुं स्थापयामि पूजयामि॥

(७) कुबेरदेवता का आवाहन—

आवाहयामि देवेशं धनदं यक्षपूजितम्।
महाबलं दिव्यदेहं नरयानगतिं विभुम्॥
ॐ वयᳪ सोम व्रते तवमनस्तनूषु बिभ्रतः।
प्रजावन्तः सचेमहि॥

ॐ भूः सोमेहागच्छ। सोमाय नमः। सोमं स्थापयामि पूजयामि।

(८) ईशानदेवता का आवाहन—

सर्वाधिपं महादेवं भूतानां पतिमव्ययम्।
आवाहये तमीशानं लोकानामभयप्रदम्॥

ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमये वयम्। पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥

ॐ भूः ईशानेहागच्छ। ईशानाय नमः। ईशानं स्थापयामि पूजयामि।

(९) ब्रह्मा (देवता) का आवाहन—

पद्मयोनिं चतुर्मूर्तिं वेदगर्भं पितामहम्।
आवाहयामि ब्रह्माणं यज्ञसंसिद्धिहेतवे॥

ॐ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः। यः शंसते स्तुवते धायि वज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः।

पूर्वेशानयोर्मध्ये ॐ भूः ब्रह्मन्निहागच्छ। ब्रह्मणे नमः। ब्रह्मणं स्थापयामि पूजयामि।

(१०) अनन्त (देवता) **का आवाहन**—

अनन्तं सर्वनागानामधिपं विश्वरूपिणम्।
जगतां शान्तिकर्तारं मण्डले स्थापयाम्यहम्॥
ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी।
यच्छा नः शर्म सप्रथाः॥

निर्ऋतिपश्चिमयोर्मध्ये ॐ भूः अनन्तेहागच्छ। अनन्ताय नमः। अनन्तं स्थापयामि पूजयामि।

दिक्पालमन्त्र-प्रयोग का यही विधान है।

द्वितीय कलश : पूजन-मन्त्र

द्वितीय कलश की स्थापना एवं उसके पूजन की दिशा में ऋग्वेद के श्रीसूक्त का प्रयोग किया जाता है।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥१॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥२॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥३॥
काँसोस्मितां हिण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥४॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वा वृणोमि॥५॥
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्या अलक्ष्मीः॥६॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतः सुराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥७॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥८॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥९॥
मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥१०॥

कर्दमेन प्रजा भूता मयि सम्भवकर्दम।
श्रियं वायस मे कुले मातरं पद्ममालिनीम् ॥११॥
आप: स्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले ॥१२॥
आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३॥
आर्द्रां य: करिणीं यष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥१५॥
य: शुचि: प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।
सूक्तं पञ्चदशर्चं च श्रीकाम: सततं जपेत् ॥१६॥

'ॐ सरसिजनिलये·····दीर्घमायु:' ॥

(इसे प्रारम्भ में ही दिया जा चुका है।)

लक्ष्मीसूक्त

पद्मानने पद्मिविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि।
विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥१॥
पद्मानने पद्मऊरू पद्माक्षि पद्मसम्भवे।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥२॥
अश्वदायि च गोदायि धनदायि महाधने।
धनं मे जुषतां देवि! सर्वकामांश्च देहि मे ॥३॥
पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवेरथम्।
प्रजानां भवसि माता आयुष्मन्तं करोतु मे ॥४॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसु:।
धनमिन्द्रो बृहस्पतिर्वरुणो धनमस्तु मे ॥५॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिन: ॥६॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मति:।
भवन्ति कृतपुण्यानां भक्त्या श्रीसूक्तजापिनाम् ॥७॥
सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥८॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥९॥

महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि।
तन्नो लक्ष्मीः प्रचोदयात् ॥१०॥
आनन्दः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः।
ऋषयश्च श्रियः पुत्रा मयि श्रीर्देवि देवता ॥११॥
ऋणरोगादिदारिद्र्यं पापं च अपमृत्यवः।
भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥१२॥
श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥१३॥

पुरुषसूक्त : तृतीय कलश

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्त्वस्येशानो यदन्नेनातिरोहति ॥२॥
एतावानस्य महिमातो ज्यायांश्च पूरुषः।
पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि ॥३॥
त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः।
ततो विष्वङ् व्यक्रामत्साशनानशनेऽअभि ॥४॥
ततो विराडजायत विराजोऽअधिपूरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥
तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्।
पशूंस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥६॥
तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जक्षिरे तस्माद्यजुस्तस्मादजायत ॥७॥
तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥८॥
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥९॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते ॥१०॥
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत ॥११॥
चन्द्रमा मनसो जातश्चक्षोः सूर्योऽजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकान् अकल्पयन्॥१३॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥१४॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वानाऽअबध्नन्पुरुषं पशुम्॥१५॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥१६॥
अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे।
तस्य त्वष्टाविदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे॥१७॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥१८॥
प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा॥१९॥
यो देवेभ्य आतपति यो देवानां पुरोहितः।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये॥२०॥
रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन्।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे॥२१॥
श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि
रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण॥२२॥

नारायणानुवाक : चतुर्थ कलश

ॐ सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्।
विश्वं नारायणं देवमक्षरं परमं पदम्॥
विश्वतः परमानित्यं विश्वं नारायणं हरिम्।
विश्वमेवेदं पुरुषस्तद् विश्वमुपजीवति॥
पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्॥
नारायणपरो ज्योतिरात्मा नारायणः परः।
नारायणपरं ब्रह्म तत्त्वं नारायणः परः॥
नारायणपरो ध्याता ध्यानं नारायणः परः।
यच्च किञ्चिज्जगत् सर्वं दृश्यते श्रूयतेऽपि वा॥
अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः।
अनन्तमव्ययं कविं समुद्रेऽन्तविश्वशम्भुवम्॥
पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम्।

अधोनिष्ठ्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति।
ज्वालामालाकुलं भाति विश्वस्यायतनं महत्।
सन्ततं शिराभिस्तु लम्बत्याकोशसन्निभम्॥
तस्यान्ते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम्।
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः॥
सोऽग्रभुक् विभजन् तिष्ठन्नाहारमजरः कविः।
तिर्यगूर्ध्वमधः शायी रश्मयस्तस्य सन्तताः॥
सन्तापयति स्वं देहमापादतलमस्तकम्।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः॥
नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा॥
तस्याः शिखाया मध्ये तु परमात्मा व्यवस्थितः।
स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्॥

पाँच ब्रह्ममन्त्र : पञ्चम कलश

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।
भवे भवे नातिभवे भवस्व माम्भवोद्भवाय नमः॥१॥
ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो
रुद्राय नमः कालाय नमः कलविकरणाय नमो
बलविकरणाय नमो बलाय नमो
बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥२॥
ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः।
सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥३॥
तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात्॥४॥
ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्।
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदा शिवोम्॥५॥

अम्भस्य पारेणानुवाक : षष्ठ कलश

ॐ हरिः। अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे
महतो महीयान्। शुक्रेण ज्योतींषि समनु प्रविष्टः।
प्रजापतिंश्चरति गर्भे अन्तः। यस्मिन्निदं सञ्चविचैति
सर्वं यस्मिन् देवा अधि विश्वे निषेदुः॥
तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्।
येनावृतं खं च महीं च येनादित्यस्तपति तेजसा भ्राजसा च॥

यमन्तः समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः ।
यतः प्रसूता जगतः प्रसूती तोयेन जीवन् व्यससर्ज भूम्याम् ।।
यदोषधीभिः पुरुषान् पशूंश्च विवेश भूतानि चराचराणि ।
अतः परं नान्यदणीयसं हि परात्परं यन्महतो महान्तम् ।
यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ।।
तदेवर्तं तदु सत्यमाहुः तदेव ब्रह्म परमं कवीनाम् ।
इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः ।।
तदेवाग्निस्तद्वायुः तत्सूर्यस्तदु चन्द्रमाः ।
तदेव शुक्रममृतं तद् ब्रह्म तदापः स प्रजापतिः ।
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।।
कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः ।
अर्धमासा मासा ऋतवः संवत्सरश्च कल्पताम् ।।
स आपः प्रदुधे उभे इमे अन्तरिक्षमथो सुवः ।
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिज्ग्रभत् ।
न तस्येशे कश्चन तस्य नाम महद् यशः ।
न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति ।।

अद्भ्यः सम्भूतो हिरण्यगर्भः इत्यष्टौ एष हि देवः प्रदिशोऽनुसर्वाः पूर्वो हि जातः स उ गर्भे अन्तः स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखस्तिष्ठति विश्वतोमुखः । विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् । सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एकः । तेनस्तत् पश्यन् विश्वाभुवनानि विद्वान् यत्र विश्वं भवत्येकनीडम् । यस्मिन्निदꣳ सञ्चविचैकं स ओतः विभुः प्रजासु । प्रतद्वोचे अमृतं न विद्वान् गन्धर्वो नाम निहितं गुहासु ।।

ब्रह्मानन्दवल्ली : सप्तम कलश

प्रथम अनुवाक

ॐ सहनाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु । मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ।

ब्रह्मविदाप्नोति परम् । तदेषाभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति ।

तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः । स वा एष पुरुषोऽन्नरसमयः तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ।

द्वितीय अनुवाक

अन्नाद्वै प्रजा: प्रजायन्ते। या: काश्च पृथिवीं श्रिता:। अथो अन्नेनैव जीवन्ति। अथैनदपि यन्त्यन्तत:। अन्नं हि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते। सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासते। अन्नं हि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते। अन्नाद्भूतानि जायन्ते। जातान्यन्नेन वर्धन्ते। अद्यतेऽत्ति च भूतानि। तस्मादन्नं तदुच्यत इति।

तस्माद्वा एतास्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमय:। तेनैष पूर्ण:। स वा एष पुरुषविध एव। तस्य पुरुषविधतामन्वयं पुरुषविध:। तस्य प्राण एव शिर:। व्यानो दक्षिण: पक्ष:। अपान उत्तर: पक्ष:। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति।

तृतीय अनुवाक

प्राणं देवा अनु प्राणन्ति। मनुष्या: पशवश्च ये। प्राणो हि भूतानामायु:। तस्मात्सर्वायुषमुच्यते। सर्वमेव त आयुर्यन्ति ये प्राणं ब्रह्मोपासते। प्राणो हि भूतानामायु:। तस्मात्सर्वायुषमुच्यत इति। तस्यैष एव शारीर आत्मा य: पूर्वस्य।

चतुर्थ अनुवाक

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति। तस्यैष एव शारीर आत्मा य: पूर्वस्य।

तस्माद्वा एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमयस्तेनैष पूर्ण:। स वा एष पुरुषविध एव। तस्य पुरुषविधतामन्वयं पुरुषविध:। तस्य श्रद्धैव शिर:। ऋतं दक्षिण: पक्ष:। सत्यमुत्तर: पक्ष:। योग आत्मा। मह: पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति।

पञ्चम अनुवाक

विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च। विज्ञानं देवा: सर्वे। ब्रह्म ज्येष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्वान्कामान्समश्नुत इति। तस्यैष एव शारीर आत्मा य: पूर्वस्य।

तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमय:। तेनैष पूर्ण:। स वा एष पुरुषविध एव। तस्य पुरुषविधतामन्वयं पुरुषविध:। तस्य प्रियमेव शिर:। मोदो दक्षिण: पक्ष:। प्रमोद उत्तर: पक्ष:। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति।

सप्तम अनुवाक

असद्वा इदमग्र आसीत्। ततो वै सदजायत्। तदात्मानं स्वयमकुरुत। तस्मात्तत्सुकृतमुच्यत इति।

यद्वै तत्सुकृतं रसो वै स:। रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति। को ह्येवान्यात्मक: प्राण्याद् यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयति।

यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां वितन्यते। अथ सोऽभयं गतो भवति।

यदा ह्येवैष एतस्मिन्नु दरमन्तरं कुरुते। अथ तस्य भयं भवति। तत्त्वेव भयं विदुषो मन्वानस्य। तदप्येष श्लोको भवति।

अष्टम अनुवाक

भीषास्माद्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम इति।

सैषाऽऽनन्दस्य मीमांसा भवति। युवा स्यात्साधुयुवाध्यापक आशिष्टो द्रढिष्ठो बलिष्ठस्तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः।

ते ये शतं मानुषा आनन्दाः। स एको मनुष्यगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य।

ये ते शतं मनुष्यगन्धर्वाणामानन्दाः। स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य।

ते ये शतं देवगन्धर्वाणामानन्दाः। स एकः पितृणां चिरलोकलोकानामानन्दः। श्रोत्रियस्य चाकामहतस्य॥

ते ये शतमाजानजानां देवानामानन्दाः। स एकः कर्मदेवानां देवानामानन्दः। ये कर्मणा देवानपि यन्ति। श्रोत्रियस्य चाकामहतस्य।

ते ये शतं कर्मदेवानां देवानामानन्दाः। स एको देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य।

ते ये शतं देवानामानन्दाः। स एक इन्द्रस्यानन्दः श्रोत्रियस्य चाकामहतस्य।
ते ये शतमिन्द्रस्यानन्दाः। स एको बृहस्पतेरानन्दः। श्रोत्रियस्य चाकामहतस्य।
ते ये शतं बृहस्पतेरानन्दाः। स एकः प्रजापतेरानन्दः। श्रोत्रियस्य चाकामहतस्य।
ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य।

स यश्चायं पुरुषे यश्चासावादित्ये स एकः। स य एवंविदस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसंक्रामति। एतं प्राणमयमात्मानमुपसंक्रामति। एतं मनोमयमात्मानमुपसंक्रामति। एतं विज्ञानमयमात्मानमुपसंक्रामति। एतमानन्दमयमात्मानमुपसंक्रामति। तदप्येष श्लोको भवति।

नवम अनुवाक

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति।

एतं ह वाव न तपति। किमहं साधु नाकरवम्। किमहं पापमकरवमिति। स विद्वानेते आत्मानं स्पृणुते। उभे ह्येवैष एते आत्मानं स्पृणुते। य एवं वेद। इत्युपनिषत्।

ब्रह्मानन्दवल्ली समाप्त

भृगुवल्ली : अष्टम कलश

ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै। ॐ शान्तिः शान्तिः शान्तिः।

प्रथम अनुवाक

भृगर्वै वारुणिः वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति। तस्मा एतत्प्रोवाच। अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति। तं होवाच। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद् ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा।

द्वितीय अनुवाक

अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत्। स तपस्तप्त्वा।

तृतीय अनुवाक

प्राणो ब्रह्मेति व्यजानात्। प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते। प्राणेन जातानि जीवन्ति। प्राणं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा।

चतुर्थ अनुवाक

मनो ब्रह्मेति व्यजानात्। मनसो ह्येव खल्विमानि भूतानि जायन्ते। मनसा जातानि जीवन्ति। मनः प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत्। स तपस्तप्त्वा।

पञ्चम अनुवाक

विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत्। स तपस्तप्त्वा।

षष्ठ अनुवाक

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता। स य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

सप्तम अनुवाक

अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणाः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

अष्टम अनुवाक

अन्नं न परिचक्षीत। तद् व्रतम्। आपो वा अन्नम्। ज्योतिरन्नादम्। अप्सु ज्योतिः प्रतिष्ठितम्। ज्योतींष्यापः प्रतिष्ठिताः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या।

नवम अनुवाक

अन्नं बहु कुर्वीत। तद् व्रतम्। पृथिवी वा अन्नम्। आकाशोऽन्नादः। पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या।

दशम अनुवाक

न कञ्चन वसतौ प्रत्याचक्षीत। तद् व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। आराध्यस्मा अन्नमित्याचक्षते। एतद्वै मुखतोऽन्नं राद्धम्। मुखतोऽस्मा अन्नं राध्यते। एतद्वै मध्यतोऽन्नं राद्धम्। मध्यतोऽस्मा अन्नं राध्यते। एतद्वा अन्ततोऽन्नं राद्धम्। अन्ततोऽस्मा अन्नं राध्यते। य एवं वेद।

क्षेम इति वाचि। योगक्षेम इति प्राणापानयोः। कर्मेति हस्तयोः। गतिरिति पादयोः। विमुक्तिरिति पायौ। इति मानुषीः समाज्ञाः। अथ दैवीः। तृप्तिरिति वृष्टौ। बलमिति विद्युति। यश इति पशुषु। ज्योतिरिति नक्षत्रेषु। प्रजातिरमृतमानन्द इत्युपस्थे। सर्वमित्याकाशे।

तत्प्रतिष्ठेत्युपासीत। प्रतिष्ठावान् भवति। तन्मह इत्युपासीत। महान् भवति। तन्मन इत्युपासीत। मानवान् भवति। तदन्नम् ह्युपासीत। नम्यन्तेऽस्मै कामाः। तद् ब्रह्मेत्युपासीत। ब्रह्मवान् भवति। तद् ब्रह्मणः परिमर इत्युपासीत। पर्येणं म्रियन्ते द्विषन्तः सपत्नाः। परि येऽप्रिया भ्रातृव्याः।

स यश्चायं पुरुषे यश्चासावादित्ये स एकः। स य एवंवित्। अस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसंक्रम्य। एतं प्राणमयमात्मानमुपसंक्रम्य। एतं मनोमयमात्मानमुपसंक्रम्य। एतं विज्ञानमयमात्मानमुपसंक्रम्य। एतमानन्दमयमात्मानमुपसंक्रम्य। इमांल्लोकान्कामान्नी कामरूप्यनुसञ्चरन्। एतत् साम गायन्नास्ते।

हा३वु हा३वु हा३वु। अहमन्नमहमन्नमहमन्नम्। अहमन्नादो३ऽहमन्नादो३ऽहमन्नादः। अहं श्लोककृदहं श्लोककृदहं श्लोककृत्। अहमस्मि प्रथमजा ऋता३स्य। पूर्वं देवेभ्योऽमृतस्य ना३भायि। यो मा ददाति स इदेव मा३वाः। अहमन्नमन्नमदन्तमा३द्मि। अहं विश्वं भुवनमभ्यभवा३म्। सुवर्णज्योतीः। य एवं वेद। इत्युपनिषत्।

ॐ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मावादिषम्। ऋतमवादिषम्। सत्यमवादिषम्। तन्मामावीत्। तद्वक्तारमावीत्। आवीन्माम्। आवीद्वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः।

सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै।

ॐ शान्तिः शान्तिः शान्तिः।

इति भृगुवल्ली समाप्ता

नवम कलश का पूजन

इस कलश का पूजन मूल मन्त्र से करना चाहिए।

(अभिषेक के कलश की स्थापना के समय प्रत्येक कलश की स्थापना के विविध मन्त्र हैं। कलश-स्थापना की विधि में इन मन्त्रों की विशिष्ट भूमिका है।)

कलश-स्थापन एवं मन्त्र

(प्रथम कलश)	(द्वितीय कलश)	(तृतीय कलश)	(चतुर्थ कलश)
इन्द्र, अग्नि, यम, निर्ऋति, वरुण, वायु, कुबेर, ईशान, ब्रह्मा, अनन्त का आवाहन।	श्रीसूक्त का पाठ, लक्ष्मीसूक्त का पाठ	पुरुषसूक्त का पाठ	नारायणानुवाक

(पञ्चम कलश)	(षष्ठ कलश)	(सप्तम कलश)	(अष्टम कलश)	(नवम कलश)
पञ्च ब्रह्ममन्त्र	अम्भस्यपारेणानुवाक	ब्रह्मानन्दवल्ली (तै.उप.)	भृगुवल्ली (तै.उप.)	मूल मन्त्र

ज्योतिष एवं वास्तुशास्त्र की महत्त्वपूर्ण पुस्तकें

भाषा टीका सहित

- **ग्रहलाघवम्**। ब्रह्मानन्द त्रिपाठी
- **लघुजातकम्**। कमलकान्त पाण्डेय
- **फलित विकास**। रामचन्द्र पाठक
- **सूर्यसिद्धान्तः**। रामचन्द्र पाण्डेय
- **जातकालङ्कार**। सत्येन्द्र मिश्र
- **जातकपारिजात**। हरिशंकर पाठक
- **मुहूत्तपारिजात**। सीताराम झा
- **भावप्रकाश**। सत्येन्द्र मिश्र
- **भुवनदीपक**। सत्येन्द्र मिश्र
- **षट्पञ्चाशिका**। गुरुप्रसाद गौड़
- **पञ्चस्वराः**। सत्येन्द्र मिश्र
- **लघुपाराशरी-मध्यापाराशरी**। सुरकान्त झा
- **बृहत्पाराशरहोराशास्त्रम्**। पद्मनाभ शर्मा
- **(केशवीय) जातकपद्धतिः**। सुरकान्त झा
- **भावकुतूहलम्**। हरिशंकर पाठक
- **सर्वार्थचिन्तामणिः**। गुरुप्रसाद गौड़
- **नक्षत्रचिकित्सा-ज्योतिषम्**। अभयकात्यायन
- **समरसारः**। अभय कात्यायन
- **प्रश्नमार्गः**। गुरुप्रसाद गौड़ (१-२ भाग)
- **दशाफलदर्पणः**। हरिशंकर पाठक
- **सिद्धान्तशिरोमणिः**। सत्यदेव शर्मा
- **मयमतम्**। शैलजा पाण्डेय (१-२ भाग)
- **वास्तुमण्डनम्**। श्रीकृष्ण 'जुगनू'
- **आर्यभटीयम्**। सत्यदेव शर्मा
- **मुहूर्त्तकल्पद्रुमः**। श्रीकृष्ण 'जुगनू'
- **सुगम फलित ज्योतिष**। ब्रह्मानन्द त्रिपाठी
- **लीलावती**। सीताराम झा
- **मकरन्दप्रकाशः**। लषणलाल झा
- **सर्वतोभद्रचक्रम्** । ब्रह्मानन्द त्रिपाठी
- **फलचिन्तामणि**। कुलानन्द झा
- **राजवल्लभमण्डनम्**। शैलजा पाण्डेय
- **फलितसंग्रह**। सत्येन्द्र मिश्र
- **मुहूर्तदीपकः**। गुरुप्रसाद गौड़
- **प्रश्नवैष्णवः**। गुरुप्रसाद गौड़
- **केरलप्रश्नशास्त्रसंग्रह**। गुरुप्रसाद गौड़
- **प्रश्नभूषणम्**। गुरुप्रसाद गौड़
- **गृहवास्तुप्रदीपः**। शैलजा पाण्डेय
- **कुण्डार्कः**। अभय कात्यायन
- **ताजिक पद्मकोषः**। अभय कात्यायन
- **पूर्वकालामृतम्**। रामचन्द्र पाण्डेय
- **अद्भुतसागरः**। शिवकान्त झा
- **प्रश्नचण्डेश्वरः**। अभय कात्यायन
- **सामुद्रिकशास्त्रम्**। अभय कात्यायन
- **वास्तुशास्त्रसार**। स्वामी प्रखर प्रज्ञानन्द
- **रमलनवरत्नम्**। अभय कात्यायन
- **बृहत्संहिता**। अच्युतानन्द झा
- **बृहद्वास्तुमाला**। रामनिहोर द्विवेदी
- **बृहत्जातक (होराशास्त्र)**। सत्येन्द्र मिश्र
- **दैवज्ञवल्लभाः**। गुरुप्रसाद गौड़
- **अर्थर्वेदीय ज्योतिष**। अभय कात्यायन
- **खेटकौतुकम्**। श्रीनारायणदास
- **जातकतत्त्वम्**। हरिशंकर पाठक
- **ताजिकनीलकण्ठी**। सीताराम झा
- **दीर्घवृतलक्षणम्**। सत्यदेव शर्मा
- **फलदीपिका**। हरिशंकर पाठक
- **भार्गव नाडिका**। अभय कात्यायन
- **मानसागरी**। मधुकान्त झा
- **मुहूर्तचिन्तामणिः**। विन्ध्येश्वरीप्रसाद द्विवेदी
- **वेदाङ्गज्योतिषम्**। शिवराज कौण्डिन्यायन
- **शीघ्रबोधः**। ब्रह्मानन्द त्रिपाठी
- **सरलत्रिकोणमितिः**। सत्यदेव शर्मा
- **हस्तसञ्जीवनम्**। सुरकान्त झा

प्राप्ति स्थान

चौखाम्बा पब्लिशिंग हाऊस
4697/2, 21-ए, अंसारी रोड़,
दरियागंज नई दिल्ली - 110002
फोन न. 011-23286537, 32996391

चौखम्बा सुरभारती प्रकाशन
के - 37/117 गोपाल मंदिर लेन
वाराणसी-221001
फोन न. 0542-2335263, 2335264

तन्त्रशास्त्र के महत्वपूर्ण ग्रन्थ - मूल संस्कृत एवं हिन्दी टीका सहित

- **तन्त्रसार** : परमहंस मिश्र (1-2 भाग)
- **कुलार्णवतन्त्रम्** : परमहंस मिश्र
- **नित्योत्सव** : (श्रीविद्याविमर्शकसद्ग्रन्थ) परमहंस मिश्र
- **त्रिपुरारहस्यम्** : (ज्ञान एवं महात्म्य खण्ड) जगदीशचन्द्र मिश्र (1-2 भाग)
- **तन्त्रालोक** : राधेश्याम चतुर्वेदी (1-5 भाग)
- **स्वच्छन्दतन्त्रं** : राधेश्याम चतुर्वेदी (1-2 भाग)
- **नेत्रतन्त्रम्** : राधेश्याम चतुर्वेदी
- **कामाख्यातन्त्रम्** : राधेश्याम चतुर्वेदी
- **महाकालसंहिता** : (कामकला-कालीखण्ड) राधेश्याम चतुर्वेदी
- **महाकालसंहिता** : (गुह्यकाली-खण्ड) राधेश्याम चतुर्वेदी (1-5 भाग)
- **रुद्रयामलम्** : सुधाकर मालवीय (1-2 भाग)
- **शारदातिलकम्**-सुधाकर मालवीय (1-2 भाग)
- **मन्त्रमहोदधि** : सुधाकर मालवीय
- **लक्ष्मीतन्त्रम्** : कपिलदेवनारायण (1-2 भाग)
- **तन्त्रराजतन्त्रम्**-कपिलदेवनारायण (1-2 भाग)
- **महानिर्वाणतन्त्रम्** : कपिलदेवनारायण
- **कामकलाविलास** : श्यामाकान्त द्विवेदी
- **वरिवस्यारहस्यम्** : श्यामाकान्त द्विवेदी
- **स्पन्दकारिका** : श्यामाकान्त द्विवेदी
- **सर्वोल्लासतन्त्रम्** : एस. खण्डेलवाल
- **नीलसरस्वतीतन्त्रम्** : एस. खण्डेलवाल
- **भूतडामरतन्त्रम्** : एस. खण्डेलवाल
- **सिद्धनागार्जुनतन्त्रम्** : एस. खण्डेलवाल
- **अन्नदाकल्पतन्त्रम्** : एस. खण्डेलवाल
- **त्रिपुरार्णवतन्त्रम्** : एस. खण्डेलवाल
- **विज्ञानभैरव** : बापूलाल अँजना
- **अहिर्बुध्न्यसंहिता** : सुधाकर मालवीय (श्रीपाञ्चरात्रागमान्तर्गता) (1-2 भाग)
- **देवीरहस्यम्** : (रुद्रयामलतन्त्रोक्तम्) कपिलदेवनारायण (1-2 भाग)
- **स्वर्णतन्त्र** : भाषा टीका
- **महानिर्वाणतन्त्रम्** : कपिलदेवनारायण
- **बृहत्तन्त्रसार** : कपिलदेवनारायण (1-2 भाग)
- **सौन्दर्यलहरी** : लक्ष्मीधरी टीका सहित सुधाकर मालवीय
- **सिद्धसिद्धान्तपद्धति** : द्वारकादास शास्त्री

◆ ◆ ◆

डॉ. श्यामाकान्त द्विवेदी द्वारा हिन्दी में लिखित

तंत्र विषयक महत्त्वपूर्ण शास्त्रीय ग्रन्थ

- **श्रीविद्या-साधना** : (श्रीविद्या-उपासना का साङ्गोपाङ्ग शास्त्रीय विवेचन)
- **भारतीय शक्ति-साधना** : (शक्ति-विज्ञानः स्वरूप एवं सिद्धान्त का शास्त्रीय विवेचन)
- **ब्रह्मास्त्रविद्या एवं बगलामुखी-साधना** : (महाविद्याबगला-उपासना का शास्त्रीय विवेचन)
- **काश्मीर शैवदर्शन एवं स्पन्दशास्त्र** : (शिवसूत्र, शक्तिसूत्र एवं स्पन्दसूत्र के सन्दर्भ में शास्त्रीय विवेचन)
- **मुद्राविज्ञान एवं साधना** : (नित्यकर्मीय एवं तान्त्रिक मुद्राओं का सर्वाङ्गपूर्ण, सचित्र एवं शास्त्रीय विवेचन)

◆ ◆ ◆

प्राप्ति स्थान

चौखम्बा पब्लिशिंग हाऊस
4697/2, 21-ए, अंसारी रोड़,
दरियागंज नई दिल्ली - 110002
फोन न. 011-23286537, 32996391

चौखम्बा सुरभारती प्रकाशन
के - 37/117 गोपाल मंदिर लेन
वाराणसी-221001
फोन न. 0542-2335263, 2335264